- More flexible teaching and learning environment
- More amenable for self and continuous learning
- Better opportunities for experiential learning

## *Models of Blended Learning:*

Blended Learning Programme means blending many teaching method. Successful learning depends on the model which was used by the teacher according to the nature of content and knowledge of the students. The teacher was given more freedom to use any model according to place and pace. Many educationists have suggested distinct models of Blended Learning. Among them Horn **and Staker** (2011) gave the widely accepted six models of Blended Learning. These models are discussed in detail as following:

1. **Face to Face driver Model**
2. **Rotation Model**
3. **Flex Model**
4. **Online-Lab Model**
5. **Self-Blend Model**
6. **Online Driver Model**

### *1. Face-to-face driver model*

In face –to- face driver model, teacher offers primarily face-to-face instruction, supplemented with technology in the classroom or computer lab. This model is almost identical to the standard traditional classroom aided by online learning. In this model, teacher covers most of the content through face-to-face teaching. According to this model every student doesn't get chance to take additional online training. Only a handful of students have the opportunity to supplement or improve their learning by learning in online mode. Therefore, students get the opportunity to learn at their own pace through the use of technology in the classroom. It mainly targets the individual needs of those learners who are struggling or would like to go above and beyond.

### *2. Rotation Model*

In rotation model, Student rotates between self-paced online learning and face-to-face instruction. Schedules are fixed but flexible. Some part of the content is covered by online learning either remotely (off-site) or on-site and the other part is covered in face-to-face class with teachers. Learning in all its forms is supervised by the teacher. In this model a group of students is divided into smaller units to perform different type of tasks. It allows students with a wide variety of learning styles to get the most out of training. Students move from one learning activity to another learning activity, either in a formal teacher-led learning session, or online in a self-directed way.

### *3. Flex Model*

In this model, a most of the instructional material is delivered online using a digital platform. Although teacher is present throughout the teaching learning process but teacher provides only support or guidance. It is totally self-learning, as students learn independently and practice new concepts in a digital environment. The students control their learning path, choosing what to learn. This model is mainly used for students who are at risk or leaving school i.e. dropout students.

### *4. Online-Lab Model*

This blended learning model is entirely digital. In this model, the entire curriculum is completely designed and covered by a digital platform but in a reliable visual environment and students should complete their course in computer lab. Instructions takes place in a brick and mortar lab, Delivered by an online teacher and supervised onsite by paraprofessionals. Students can access content on mobile devices (m-Learning), laptops or tablets.

This model is very beneficial in the case of a lack of resources such as teachers unavailability. It helps learners to learn at their own pace and interest without affecting the learning environment of other students.

### *5. Self-Blend Model*

Self – blend model of blended learning gives students the opportunity to learn beyond what is already provided at their school. Students take online courses to supplement their tradition schools face to face course catalogue. For this form of integrated learning to be effective, learners need to be highly motivated. Self-blend is great for a student who wants to take additional advanced placement courses, or who is interested in an uncovered study area in the traditional studies catalogue.

### *6. Online Driver Model*

This model is opposite version from face-to-face driver model. In this model majority of content is covered by digital platform, with periodic face-to-face meetings. Students work from remote locations (e.g., their homes) and receive all of their instruction via online platforms. Students are given opportunity to interact with teacher in online platform if they have any queries. Students can engage with the teacher through e-mail, chats or message. This model is very beneficial for those students who find themselves difficult to attend the school because of their chronic illnesses/handicaps.

***Benefits of blended learning:***

Recent research identifies the following key benefits of blended learning

1. **Personalized learning :** Online tools enable the teachers to personalize instruction for handling different paces/styles of learning
2. **Increased interaction:** Blended learning offers a platform to facilitate greater interactivity between students, as well as between students and teachers. Multiple communication platforms give students more interaction opportunities with the teacher and other students.
3. **Opportunity for collaboration at a distance:** Each student work together virtually in an intellectual attempt as a learning practice. Collaborative learning is enhanced by allowing students to exchange and contribute resources in the online environment.
4. **Increased Interest:** Learning becomes more interesting and mobile through the internet and multiple delivery platforms. This helps in gaining the attention of 21$^{st}$ century learners.
5. **High learning retention:** Blended learning approaches result in a higher knowledge retention rate. It also helps refresh and update the learning material whenever needed.
6. **Time and money savings:** E-learning reduces time away from the workplace, eliminates the need for travel and removes the need for classroom based training.
7. **Increased flexibility:** In blended learning students are free to learn using e-learning at their own convenience and at a pace that is right for them. Technology-enabled learning allows for learning anytime and anywhere, letting students learn without the barriers of time and location but with the possible support of in-person engagement.
8. **Enhanced learning:** Additional types of learning activities improve engagement and can help students achieve higher and more meaningful levels of learning.
9. Strategic planning allows the teacher to give more time for discussions and high-order thinking activities during face-to-face interaction.

***Advantages of Blended Learning for Students :***

1. Blended learning allows students to learn at their own pace due to flexibility and access to online resources. This helps to balance a classroom that contains both quick and slow learners. It can promote deeper learning, reduce stress and increase student satisfaction.
2. Blended learning provides a growing opportunity for students to interact with their professors and teachers. They can connect via E-mail, through progress reports on the program, or on discussion boards and chat room.
3. The engagement and interaction with the resources keeps students focused for longer periods. This engagement also helps to enhance learning through exploration and research.

4. The use of eLearning materials increases a learner's ability to set appropriate learning goals and to control his / her learning, which develops the ability to translate into all subjects.
5. Students become self-driven and responsible, tracking their individual achievements, which helps develop the ability to find the resources or get the help they need, self-advocating so they can reach their goals.
6. Students can control the pace of their learning. Every student can practice and tackle new material with timing that is perfect just for them.
7. Due to the integration of technology into school lessons, students are more likely to be interested in, focused on, and excited about the subjects they are studying.

### *Advantages of Blended Learning for Teachers:*

1. Teaching is less expensive to deliver, and more time-saving
2. Blended learning provides flexibility depending on availability. In Blended learning students can access the content material from anywhere at any time while enjoying the benefits of face-to-face support and instruction.
3. E-learning allows for effective communication between students and their teachers through emails, chat boards and a chat room.
4. E-learning can improve the quality of teaching and learning as it supports face-to-face teaching methods.
5. Blended learning also improves some teaching factors such as team teaching, better information and feedback on work, individualized professional development plans.
6. Teachers can be more involved with their students
7. The ability to rapidly analyze, review and give feedback to student work, gives the teacher the ability to tailor his teaching methods and feedback for each student while improving time efficiency.

### *Challenges:*

- **Technological requirements**: It includes hardware, software and Internet access with appropriate bandwidth. These resources can create systematic lack of access. Technology tools must be available, easy to use, reliable and now used online to support learning in a meaningful way.

- **IT knowledge and skill**: Lack of IT knowledge and skill is a significant barrier to access in the first place and quality learning experiences thereafter. Access to technical support is a related and significant requirement.

- **Lack of self-pacing and self-direction:** Online learning requires and promotes student independence and management. For example, some studies indicate that more students will watch video lectures for weeks at a time rather than in a curriculum. Students come to online learning with different levels of learning; support learning self-control should be part of every online learning experience.

- **No access to internet:** Majority of population across India has still no access to internet and a large population in rural areas in still illiterate in the field of digital technology due to poor internet connectivity in rural areas and some part of urban areas.

## *Conclusion:*

It is observed that when teachers use technology in the classroom it is to show that they know to use the technology in an effective manner and sometimes the focus on the content is lost but this method improves the active participation of learners and it improves their motivation. One key concept is that blended learning is not merely the addition of some technological element to an existing course but rather is an integrated plan utilising the best of what both face-to-face and online learning have to offer. The blended learning models provide initial frameworks for the deliberate structuring of blended learning to improve learning outcomes.

## *References:*

1. Draft National Education Policy 2019.
2. Dr. P. S. Aithal & P.M. Suresh Kumar, Teaching-learning Process in higher education institutions, volume II Issue I, 2016
3. Watkar,Archana G.(2016), New Learning Technology, The Journal Of Education, Vol.16-No.1 pp 12-13
4. Agrawal, J.C.(1999), Essential of Educational Technology, Vikas Publishers pvt ltd, New Delhi
5. Sharma,R.A.(2000), Technological Foundation of India, Meerut, R.Lall Book Depot
6. Blended Mode of Teaching and Learning: Concept Note, University Grants Commission New Delhi

## Website references

https://en.wikipedia.org/blended learning

https://teachthought.com/the definition of blended learning

https://www.elelearning.com/blended learning

https://www.dreambox.com/6 models of blended learning

https://www.blended learning.com/models

 ISSN 2320-2025

# ॥ध्यानोपासनयोर्भेदाभेदविचारः॥

Prosanta Barman
(prosanta1993@gmail.com)
Assistant Professor in Sanskrit
Katwa College
Katwa, Purba Barddhaman, 713130.

## ०. उपोद्घातः

वेदान्तो नामोपनिषत्प्रमाणमिति सुधियामविप्रतिपन्नो राद्धान्तः। न तथा योगदर्शनप्रसङ्गे श्रूयते। पुनोऽद्वैततत्त्वज्ञापनमेवोपनिषत्सु दरीदृश्यते। तथाप्युपनिषदन्तर्गतसाधनतत्त्वप्रसङ्गेषु योगदर्शनोक्ततत्त्वसमन्वयः शक्यः। तस्मादुपलक्षणभूततयात्रोपनिषदुक्तोपासनाप्रसङ्गेषु योगदर्शनस्थध्यानतत्त्वसमन्वयः प्रदर्शितः। उपनिषत्सु न तथा साक्षाद्ध्यानस्वरूपोपदेश उपलभ्यते। अपि तु उपासनामुखेनैवोपदेश आम्नातः। पुनः बहुत्र उपासनाशब्दप्रयोगं विहाय विद्याशब्दप्रयोगो लभ्यते। यथा– शाण्डिल्यविद्या[1], पुरुषविद्या[2], प्राणविद्या[3] इत्येवमादयः प्रयोगाः। अतः साक्षाद्ध्यानशब्दप्रयोगादर्शनात् संशयो भवति यदुपासनायाः ध्यानं भिन्नमेव किञ्चित्तत्त्वमिति। परन्तु न तथा केवलं शब्दप्रयोगे एव भेदो दृश्यते। क्वचित् कैश्चित् ध्यानोपासनयोरभेद उक्तश्चेदपि सङ्केतरूपेणैव न तु युक्तिप्रमाणाभ्यां सविस्तरं प्रपञ्चितम्। अत एव विषयोऽयं विचारपद्वीमधिरोहति।

## १. प्रबन्धप्रयोजनम्

न कोऽपि मायाकल्पितेऽस्मिन् जगति अप्रयोजनं किञ्चिदपि कार्यार्थं प्रवर्तते। तस्मादेव "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते", "न कुर्यान्निष्फलं कर्म इति जलताडनादेरपि निषिद्धत्वात्"[4] इत्यादिवचनं सार्थकतां याति। प्रबन्धेऽस्मिन् युक्तिप्रमाणाभ्यां सविस्तरं ध्यानोपासनयोः तादात्म्यं साधितं येन जिज्ञासूनां संशयनिरसनं सुतरां सम्भवति। अर्थात् केषाञ्चिन्मतं ध्याता श्रेष्ठोऽपरेषाञ्चोपासक इत्येतादृशसंशयाः लयं यान्ति। अपि चात्र प्रमाणत्वेन ग्रन्थान्तराद्बहूनि तथ्यानि सङ्गृहीतानि सन्ति येन नवीनतथ्यज्ञानाय सहायको भवितुमर्हत्ययं प्रबन्धः। विषयेऽस्मिन् इतोऽपि नवनवतत्त्वान्वेषणायापि सहायकः स्यात् प्रबन्धोऽयमित्याशास्महे।

---

[1] छान्दोग्योपनिषत्– ३।१४

[2] छान्दोग्योपनिषत्– ३।१६

[3] कौषितक्युपनिषत्– २

[4] तर्कसंग्रहः; सम्पादकः– सत्कारिशर्मा; चौखम्भा संस्कृत संस्थान; वाराणसी; २००३; पृष्ठाङ्कः–१५

## २. पातञ्जलयोगोक्तध्यानम्

### २.१. ध्यानस्वरूपम्

पतञ्जलिप्रणीतयोगसूत्रेषु यमाद्यष्टाङ्गान्युल्लिखितानि। परन्तु पुराणादिषु क्वचित् षडङ्गयोगो ज्ञापितः। तादृशस्थलेषु यमनियमौ परित्यक्तौ।[5] न त्वस्माकं संख्यायां तात्पर्यमपि तु सर्वत्रैव योगाङ्गत्वेन ध्यानस्य ग्रहणं परिलक्ष्यत इत्येव इष्टम्। अष्टाङ्गेष्वत्र केवलं ध्यानस्वरूपमुपस्थाप्यते।

एकस्मिन्नेव निर्विचिकित्सेऽर्थे स्थापितस्य चेतसो निरवच्छिन्नतैलधारावद्यदेकतानत्वं तदेव ध्यानमित्यभिधीयते। पतञ्जलिना स्वकृतयोगदर्शनस्य विभूतिपादनामात्मके तृतीयाध्याये ध्यानस्वरूपं सूत्रितं यथा हि– "तत्र प्रत्ययैकतानता ध्यानम्"[6] इति। सूत्रस्यास्यार्थस्तावद्धारणाजनितध्येयालम्बनस्य ज्ञानवृत्तेः वृत्त्यन्तरेणापरामृष्टः सन् एकरूपप्रवाहो ध्यानम्। सूत्रस्य व्यासभाष्ये निगदितं यथा– "तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्य एकतानता [7]सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्"[8] इति। नेदं सूत्रं स्वार्थप्रकाशनाय स्वयं सम्पूर्णं, सूत्रे 'तत्र'पदस्य ग्रहणत्वात्। तस्मादर्थपरिष्कारार्थमव्यवहितपूर्वस्थस्य "देशबन्धश्चित्तस्य धारणा"[9] इत्येतस्य सूत्रस्यानुवृत्तिः कर्तव्या। एतेन परिष्कृतार्थस्तावत्– तत्र अर्थात् नाभिचक्रहृदयपुण्डरीकादिदेशेषु धारणावृत्तिविषयेषु ध्येयवस्त्वालम्बनस्य प्रत्ययस्य ज्ञानवृत्तेः वा भिन्नजातीयचित्तवृत्त्यनाकीर्णे सत्येकाकारप्रवाहो ध्यानमिति। शङ्करभगवत्पादैरपि स्वकृते पातञ्जलयोगसूत्रभाष्यविवरणे एवं प्रकारेणैव सूत्रार्थः प्रपञ्चितः।[10] अधिकारिभेदे सति 'तत्र' इत्यनेन सूत्रस्थपदेन बाह्यविषयानामपि ग्रहणं सम्भवति। 'देशबन्धा'दिसूत्रस्य व्याख्यानावसरे व्यासेन स्थापितं यथा– "नाभिचक्रे

---

[5] "आसनं प्राणसंरोधः प्रत्याहारोऽथ धारणा।
ध्यानं समाधिर्योगस्य षडङ्गानि समासतः॥" – शिवपुराणम्– ७।३७।१६

[6] पातञ्जलयोगसूत्रम्– ३।२

[7] "सदृशः प्रवाहः" इत्येवं पाठभेदो दृश्यते।

[8] Śaṅkara-bhagavatpāda. *Pātañjala-yogasūtra-bhāsya-vivaraṇam.* Ed. Polakam Sri Rama Sastri & S. R. Krishnamurthi Sastri, Madras : Government Oriental Manuscripts Library, 1952. p.– 234.

[9] पातञ्जलयोगसूत्रम्– ३।१

[10] "तत्र प्रत्ययैकतानता ध्यानम्। तस्मिन् देशे धारणावृत्तिविषये नाभिचक्रादौ। ध्येयालम्बनस्य ध्येयो देशादिः, तदालम्बनस्य। प्रत्ययस्य [एकतानता] सदृशप्रवाहः, तुल्यप्रत्ययानां प्रवाह एकाकारः प्रत्ययसन्तानः प्रत्ययान्तरेण विजातीयेन अपरामृष्टः अनाकीर्णः। तत् ध्यानम्।" इति।– Śaṅkara-bhagavatpāda. *Pātañjala-yogasūtra-bhāsya-vivaraṇam.* Ed. Polakam Sri Rama Sastri & S. R. Krishnamurthi Sastri, Madras : Government Oriental Manuscripts Library, 1952. p.– 234. (अत्र केषाञ्चिदाक्षेपः स्यात् 'पातञ्जलयोगसूत्रभाष्यविवरणं' नैव आदिशङ्कराचार्यैः कृतमिति। परन्तु न तावदस्माकं तत्र तात्पर्यमपि तु उत्तमविषयः उपस्थापित इत्येतदेव इष्टम्।)

हृदयपुण्डरीके [11]मूर्धज्योतिषि नासिकाग्रे जिह्वाग्र इत्येवमादिषु देशेषु [12]बाह्येषु च विषयेषु..."[13] इति। कीदृशेषु बाह्यविषयेष्वित्यस्मिन् प्रसङ्गे शङ्करभगवत्पादैः भाष्यविवरणे कलितं तावत्– "चन्द्रादित्यादिषु चित्तं बध्यते"[14] इति।

न हि शङ्कनीयं यद्धारणाध्यानयोरभेद इति। यतो हि धारणा प्रत्ययान्तरैः परामृष्टाऽपि भवितुमर्हति परन्तु न तथा ध्यानं, विजातीयवृत्त्यन्तरेणानाकीर्णत्वात्। विषयोऽयं दृष्टान्तपुरस्सरमुपस्थापितः भाष्यविवरणे यथा–

> धारणा तु तस्मिन्नेव ध्येये तदवस्थस्यैव चित्तस्य तद्विषयविकल्पितैः प्रत्ययान्तरैः परामृष्टाऽपि। यथा सूर्ये धार्यमाणस्य तद्गतपरिमण्डलतीव्रतरदीधितित्वादिप्रत्ययेष्वपि धारणैव। वृत्तिमात्रेण तत्रैव वर्तमानत्वाच्चित्तस्य। ध्यानं पुनः न तु तथा। भिन्नजातीयप्रत्ययान्तरापरामृष्टैकप्रत्ययप्रवाह एव हि ध्यानम्।[15] इति।

एवं क्रमेणैव पातञ्जलयोगदर्शने ध्यानस्वरूपं पर्यालोचितम्। एतादृशध्यानस्वरूपपक्षं द्रढयितुं पुराणादिषु बहूनि प्रमाणानि दृश्यन्ते। तेषु केचन एवात्र उद्ध्रियन्ते। शिवपुराणे उच्यते–

ध्येयावस्थितचित्तस्य सदृशः प्रत्ययस्य यः।
प्रत्ययान्तरनिर्मुक्तः प्रवाहो ध्यानमुच्यते॥ [16] इति।

नारदीये तावत्– "ध्यानं सद्भिर्निगदितं प्रत्ययस्यैकतानता।"[17] इत्येवम्।

---

[11] "मूर्ध्नि ज्योतिषि" इत्येवं पाठभेदः लभ्यते।

[12] "बाह्ये वा विषये" इत्येवं पाठभेदः दृश्यते।

[13] Śaṅkara-bhagavatpāda. *Pātañjala-yogasūtra-bhāṣya-vivaraṇam.* Ed. Polakam Sri Rama Sastri & S. R. Krishnamurthi Sastri, Madras : Government Oriental Manuscripts Library, 1952. p.– 233.

[14] Ibid; p.– 233.

[15] Ibid; p.– 234.

[16] शिवपुराणम्– ३।३७।५२

[17] नारदीये पूर्वभागे– ३३।१३८

### २.२. ध्याने अंशत्रयम्

ध्याने अंशत्रयं तावत् ध्याता ध्यानं ध्येयं चेति एतेषामालोचनं यथाक्रममुपस्थाप्यते।

१. आध्यात्मिकविषयेषु मुमुक्षोरेवाधिकारः। तस्मादत्र ध्याता अपि मुमुक्षुः।

२. ध्याने काचिद्ध्यानक्रिया भवति। सा क्रिया मनसा एव भवति। अर्थादत्र मनः करणं कारणं मनसः सजातीयचित्तवृत्तेरेकतानता एव ध्यानम्।

३. ध्येयमर्थाद्ध्याननिमित्तं गृहीतालम्बनमिति। आलम्बनं कथं स्यादित्यस्मिन् विषये पूर्वमेव भाष्यवचनोद्धृतिपूर्वकमालोचितं यदधिकारिभेदे सति ध्येयवस्त्वपि भिद्यते। तद्वस्तु आभ्यन्तरं बाह्यमित्युभयमपि भवितुमर्हति। तस्मादेव धारणालक्षणात्मकसूत्रस्य भाष्ये देशज्ञापनावसरे आभ्यन्तरदेशत्वेन नाभिचक्रहृदयपुण्डरीकादीनामुल्लेखस्य साक्षात्परमेवोक्तं "बाह्येषु च विषयेषु..." इति। अत एव ध्येयविषयोऽधिकारिभेदे सति भिद्यते इति सिद्धम्।

## ३. उपनिषत्स्वुपासना

### ३.१. उपासनास्वरूपम्

अधिकाधिकतया उपनिषत्स्वात्मतत्त्वमेवाम्नातं दृश्यते। परन्तु किमपि फललाभार्थमादौ साधनं किञ्चिदपेक्षते तस्मादुपनिषत्स्वपि ब्रह्मतत्त्वावबोधनाय क्वचित्साधनत्वेनोपासनादीनां तत्त्वोपदेशः श्रूयते। ध्यानोपासनयोरभेदस्वरूपमिति पूर्वोक्तप्रतिज्ञापरिपालनायात्रोपनिषदुक्तोपासनास्वरूपमादौ प्रपञ्च्यते।

सामान्यतया वक्तुं शक्यते यदुपासना मनोवृत्तिरूपेति। विशेषरूपेणोच्यते चेत्– शास्त्रोपदिष्टे कस्मिंश्चिदालम्बने विलक्षणप्रत्ययानन्तरितः सन् सजातीयचित्तवृत्तिप्रवाहकरणमेवोपासनमिति। एवमेव शङ्करभगवत्पादैरपि छान्दोग्योपिनिषद् उपोद्घातभाष्ये निगदितम्। तद्यथा– "उपासनं तु यथाशास्त्रसमर्पितं किञ्चिदालम्बनमुपादाय तस्मिन्समानचित्तवृत्तिसन्तानकरणं तद्विलक्षणप्रत्ययानन्तरितमिति विशेषः।"[18] इति। बृहदारण्यकभाष्येऽपि ख्यापितमाचार्यैस्तावत्–

> उपासनं नामोपास्यार्थवादे यथा देवतादिस्वरूपं श्रुत्या ज्ञाप्यते तथा मनसोपगम्याऽऽसनं
> चिन्तनं लौकिकप्रत्ययाव्यवधानेन यावत्तद्देवतादिस्वरूपात्माभिमानाभिव्यक्तिरिति

---

[18] शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- १ (छान्दोग्योपनिषद्)*। टीकाकाराः- श्रीमन्नरेन्द्रपुर्या-नन्दगिर्य-भिनवनारायणा-नन्देन्द्रसरस्वत्यः, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११। पृष्ठाङ्कः– ५.

लौकिकात्माभिमानवत्। "देवो भुत्वा देवानप्येति" "किं देवतोऽस्यां प्राच्यां दिश्यसि" इत्येवमादिश्रुतिभ्यः।[19](१।३।९) इति।

पुनः तैत्तिरीयोपनिषदः शीक्षावल्ल्याः भाष्येऽप्याचार्यैरुपासनास्वरूपं विज्ञापितं हि- "उपासनं च यथाशास्त्रं तुल्यप्रत्ययसन्ततिरसङ्कीर्णा चातत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च।"[20](१।३।४) इति।

उपासनाशब्दस्य व्युत्पत्त्यनुसारेणोपासनास्वरूपं पर्यालोचयामश्चेदप्युपनिषदुक्तस्वरूपमेव द्रढयति न तु हानिं जनयति। उपासना इत्यत्र 'उप' अर्थात् समीपे 'आसना' अर्थात् स्थितिः। प्रसङ्गेऽस्मिन् विचारस्तावत्– मनसि आलम्बनरूपेण स्वीकृतविषयस्य प्रत्ययान्तरेणाव्यवहितः सन् स्थित्वा तत्र समानचित्तवृत्तिप्रवाहरूपा उपासनेति। उपासना उपासनमित्यनयोः समानार्थकत्वमिति। यतो ह्युभयमपि उपवेशनार्थकात् आस्-धातोः निष्पद्यते। तत्परतैकनिष्ठतेत्यादिष्वप्युपासनाशब्दप्रयोगो भूयशो दृश्यते। शङ्करभगवत्पादैर्यथा तैत्तिरीयोपनिषदः शिक्षावल्लीभाष्ये उदाहृतं–

> प्रसिद्धश्चोपासनशब्दार्थो लोके गुरुमुपास्ते राजानमुपास्त इति। यो हि गुर्वादीन्सन्ततमुपचरति स उपास्त इत्युच्यते।[21](१।३।४) इति।

### ३.२. उपासनायामंशत्रयम्

ध्यानवदत्राप्यंशत्रयं तावदुपासक उपासना उपास्यमित्येतेषां यथाक्रममधः पर्यालोचनं प्रपद्यते।

१. उपासनायां कीदृशोऽधिकारी भवेदिति चेत् त्यागब्रह्मचर्यशमदमादिसम्पन्नः सन् उपासना कर्तव्येत्यत्र नास्ति तावत् संशयावकाशो यत् मुमुक्षुः एवात्राप्यधिकारीति।

२. उपासनापि काचित्क्रिया। क्रियां सम्पादयितुं किञ्चित्करणमपेक्ष्यते कारणं हि केनोपासना कर्तव्या इत्यनेन ज्ञायतेऽस्ति तावत् किञ्चित् करणमुपासनायाः। तत् करणं मन एव अर्थात् मनसा एव उपासना सम्भवतीति सुधियामविप्रतिपन्नं मतम्। ब्रह्मतत्त्वावबोधनाय मन एव करणमित्युपनिषत्स्वपि श्रूयते। मुण्डकोपनिषदि यथा–

---

[19] शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- २ (बृहदारण्यकोपनिषद्)।* टीकाकारौ- श्रीमदानन्दगिरिविद्यारण्यमुनी, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११। पृष्ठाङ्कः– ४३.

[20] शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- १ (आदितः अष्टौ उपनिषदाम्)।* टीकाकाराः- श्रीमदानन्दगिरिः अन्ये प्रसिद्धाचार्याश्च, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११। पृष्ठाङ्कः– ३८५.

[21] तदेव।

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा।

ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः॥[22] इति।

ज्ञानप्रसादेन चित्तशुद्धौ जाते सति तादृशचेतसा ध्यायमानः सन्नेव ब्रह्मतत्त्वं ज्ञायते। अर्थात् मनसा एवोपासनं ध्यानं वेति सिद्धम्। एवमन्यत्राप्युपनिषत्स्वाम्नातं हि– "एषोऽणुरात्मा चेतसा वेदितव्यो"[23], "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः"[24], "मनसैवेदमाप्तव्यम्"[25] इत्येवम्। अत्र केषाञ्चिदाक्षेपः स्यायत् परमात्मनश्चेतसागोचरत्वमुपनिषत्सु भूयशः श्रूयते। तत्तावत् केनोपनिषदि– "न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः"[26] इति। पुनस्तत्रैव–

यन्मनसा न मनुते येनाहुर्मनो मतम्।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥[27] इति।

तैत्तिरीयेऽपि यथा– "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"[28] इति। अर्थान्मनसा उपासनादिकं नैव सम्भवतीति चेन्न, यतो हि तादृशस्थलेषु ब्रह्मणः दुर्विज्ञेयत्वनिर्वचनत्वादिकमभिप्रेतं न तु मनसा उपासनादीनामसम्भवत्वमिति। ब्रह्मणो निर्गुणत्वेऽपि उपासनादिषु सौकर्यार्थं नामरूपादिभिः सगुणत्वादिकमध्यारोपनीयमिति। अत एव मनसा एव उपासना सम्भवति।

३. कस्योपासना कर्तव्या अर्थादुपासनायां राजते किञ्चिदुपास्यवस्तु इति। कारणं हि विषयमतिरिच्य मनो नैव चिन्तयति। अत्राप्यधिकारिभेदे सत्युपास्यविषयो भिद्यते। अद्वैतवेदान्ते ब्रह्मज्ञानमेव परमप्राप्तिरत एव तत्र ब्रह्म एव उपास्यम्। परन्तु सगुणब्रह्मण एव उपास्यविषयत्वं सम्भवति न तु निर्गुणब्रह्मणः। उपास्यवस्तु सर्वदा चक्षुरादीन्द्रियग्राह्यं भवेदिति नियमो नास्ति। परन्तु मन्दाधिकारिणां कृते शालग्रामशीलादिष्वध्यारोपमुखेनोपासनातत्त्वोपदेशः श्रूयते। पुनस्तथैव नचिकेतादिवदुत्तमाधिकारिणां कृते साक्षादात्मतत्त्वोपदेशोऽप्युपनिषत्स्वाम्नातं दृश्यते। अत एव उपासानायामधिकारिभेदे सति विषयोऽपि भिद्यते। इत्येतदुपासनायाः अंशत्रयम्।

---

[22] मुण्डकोपनिषत्– ३।१।८

[23] मुण्डकोपनिषत्– ३।१।९

[24] कठोपनिषत्– १।३।१२

[25] बृहदारण्यकोपनिषत्– ४।४।१९

[26] केनोपनिषत्– १।३

[27] केनोपनिषत्– १।६

[28] तैत्तिरीयोपनिषत्– २।४,९

## ४. ध्यानोपासनयोस्तादात्म्यम्

एतावता प्रतिपादितविचारादेव ध्यानोपासनयोस्तादात्म्यं स्पष्टं प्रतिभाति। यतो हि दृष्टं यद्ध्यानस्वरूपं नाभिचक्रहृदयपुण्डरीकादिदेशेषु धारणावृत्तिविषयेषु ध्येयवस्त्वालम्बनस्य प्रत्ययस्य ज्ञानवृत्तेः वा भिन्नजातीयचित्तवृत्त्यानाकीर्णे सति निरवच्छिन्नतैलधारावदेकाकारप्रवाह एव इति। तथैव उपनिषदादिषु उपासनायाः स्वरूपमुपस्थापितम्। उपासनापक्षं द्रढयितुं सर्वोपनिषत्सारसङ्ग्रहस्वरूपत्वात् श्रीमद्भगवद्गीतायाः शाङ्करभाष्यादप्यत्रोद्धर्तुं शक्यते यत्– "उपासनं नाम यथाशास्त्रस्य उपास्यस्यार्थस्य विषयीकरणेन सामीप्यं उपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनमाचक्षते।"[29] इति। अपि च शङ्करभगवत्पादैः :छान्दोग्योपनिषद्भाष्ये साक्षाद्यद्ध्यानस्वरूपं गदितं तत्तात्पर्यतः उपासनास्वरूपादंशमात्रेणापि नैव भिद्यते। तद्ध्यानस्वरूपं तावत्–

> "ध्यानं नाम शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययसन्तानः।
> एकाग्रतेति यमाहुः।"[30](७।६।१) इति।

अत्राक्षेपः सम्भवति यद्ध्यानोपासनोः साम्यं चेद्भाष्यकारैः किमर्थमुपासनशब्दप्रयोगो न कृत इति चेदादौ वक्तव्यं यत् मन्त्रे ध्यानशब्दप्रयोगत्वादाचार्यैरपि तथा प्रयोगः कृतः। पुनः भिन्नशब्दप्रयोगे सति अनुभवलब्धसिद्धान्तो नैव भिद्यते। अत एव ध्यानोपासनयोरभेदसिद्धिः जाता।

पुनः ध्यानोपासनयोरंशत्रयेऽपि साम्यं दृश्यते। तत्र केवलं शब्दप्रयोगे एव भेदो न तु तात्पर्यार्थे। ध्यानस्यांशत्रयं यथा ध्याता ध्यानं ध्येयं तथैवोपासनाया अप्युपासक उपासना उपास्यमिति। तात्पर्यत्वेनोभयत्राप्याधिकारी सजातीयचित्तवृत्तिप्रवाहः आलम्बनविषयश्चेत्यंशत्रयमपि समानम्। अत उभयोर्मध्ये भेदः सम्भावयितुं नैव शक्यते कदापीति।

अन्ततो गत्वा आध्यात्मिकविषयेषु मुमुक्षु एवाधिकारी भवति। तथैवात्र उभयप्रसङ्गेऽप्यधिकारः मुमुक्षोरेव। तस्मादेवं क्रमेण विचारपुरस्सरं सर्वतोऽपि योगदर्शनोक्तध्यानमुपनिषदुक्तोपासना इत्यनयोस्तादात्म्यं सिद्धति न त्वत्र काचिदपि विप्रतिपत्तिः सम्भवति।

---

[29] श्रीमद्भगवद्गीता शाङ्करभाष्यम्– १२।३

[30] शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- २ (छान्दोग्योपनिषद्)*। टीकाकाराः- श्रीमन्नरेन्द्रपुर्या-नन्दगिर्य-भिनवनारायणा-नन्देन्द्रसरस्वत्यः, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११। पृष्ठाङ्कः– ३१०-३११.

 ISSN 2320-2025

## ५. उपसंहारः

प्रसन्नगाम्भीरविषयस्यास्य पौनःपुन्यालोचनेन सर्वदापि रत्नाकराद्बहुमूल्यनवीनाश्चर्यसम्भृतरत्नाविष्कारवन्नवीनतत्त्वमाविर्भवति। दृष्टान्तस्तावत्– ध्याननिदिध्यासनमित्यनयोः तादात्म्यं सम्भवति न वेत्यत्र राजते संशयावकाशः। कारणं हि क्वचिद्वेदान्तसारादिग्रन्थेषु "विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्"[31] इत्येवं क्रमेणाभेदः प्रदर्शितश्चेदपि सुरेश्वराचार्यप्रणीते पञ्चीकरणवार्तिकस्य टीकायां वार्तिकाभरणे तयोर्भेद एव भणित इति भाति। कथमिति चेद्ध्याने चित्तवृत्तेः लयदर्शनपूर्वकं निदिध्यासने 'अहं ब्रह्मास्मि' इत्यभेदज्ञानोदयप्रदर्शनेन। तत्र वार्तिकाभरणे यथा– "चित्तस्य समाधानं ब्रह्मात्माभेदकारतया अवस्थानमखण्डब्रह्माकारवृत्तिरूपेण परिणामः, न तु शास्त्रान्तरप्रसिद्धचित्तवृत्तिनिरोध इत्यर्थः।" इति। अत्र तु केवलं दिग्दर्शनमात्रं कृतम्। अन्येऽपि उत्तमगवेषकाः नवनवार्थोन्मेषशालिप्रज्ञालक्षणया स्वप्रतिभया इतोऽपि नवीनान्नवीनतमं तत्त्वमुद्भावयितुं शक्नुवन्तीति साधु।

*******

---

[31] श्रीसदानन्दः। वेदान्तसारः। हिन्दीव्याख्याकारः- बद्रीनाथशुक्लः, दिल्ली : मोतीलाल बनारसीदास, २००९। पृष्ठाङ्कः- २४४

## ॥उपयुक्त-ग्रन्थसूची॥

१. गर्भानन्दः, स्वामी। *पातञ्जल योगदर्शन* [सूत्रं, सूत्रानुवादः, व्यासभाष्यं, भाष्यानुवादः, मन्तव्यः च (वङ्गभाषोपनिबद्धो ग्रन्थः)]। कोलकाता : उद्बोधन कार्यालय, २०१२।

२. अन्नंभट्टः। तर्कसंग्रहः। सम्पादकः– सत्कारिशर्मा, वाराणसी : चौखम्भा संस्कृत संस्थान, २००३।

३. वेदव्यासः। *श्रीमद्भगवद्गीता (शाङ्करभाष्याद्येकादशटीकोपेता)*। संशोधनकर्ता- गजाननशर्मा, दिल्ली : परिमल पब्लिकेशन्स, २०१०।

४. शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- १ (आदितः अष्टौ उपनिषदाम्)*। टीकाकाराः- श्रीमदानन्दगिरिः अन्ये प्रसिद्धाचार्याश्च, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११।

५. शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- २ (छान्दोग्योपनिषत्)*। टीकाकाराः- श्रीमन्नरेन्द्रपुर्या-नन्दगिर्य-भिनवनारायणा-नन्देन्द्रसरस्वत्यः, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११।

६. शङ्करभगवत्पादः। *उपनिषद्भाष्यम्, खण्डः- ३ (बृहदारण्यकोपनिषत्)*। टीकाकारौ- श्रीमदानन्दगिरिविद्यारण्यमुनी, निर्देशकः- महेशानन्दगिरिमहाराजः, सम्पादकः- एस. सुब्रह्मण्यशास्त्री, वाराणसी : श्री दक्षिणामूर्तिमठः, २०११।

७. Śaṅkara-bhagavatpāda. *Pātañjala-yogasūtra-bhāṣya-vivaraṇam.* Ed. Polakam Sri Rama Sastri & S. R. Krishnamurthi Sastri, Madras : Government Oriental Manuscripts Library, 1952.

८. श्रीसदानन्दः। *वेदान्तसारः*। हिन्दीव्याख्याकारः- बदरीनाथशुक्लः, दिल्ली : मोतीलाल बनारसीदास, २००९।

*******

# आयुर्वेदे दिनचर्या

1.डा.सत्यव्रतनन्दः
अनुसन्धान सहायक(सं.)
2.डा.टी.साकेतरामः
अनुसन्धान अधिकारी(आयु.)
3.डा.जी.पी.प्रसादः(आयु.)
प्रभारी सहायक निदेशक
राष्ट्रीय आयुर्विज्ञान संपदा केन्द्रम्,हैदराबाद

**शोधसारः–** *दैनन्दिनजीवनप्रक्रियायां आहार-विहार-आचारादीनां भूमिका महत्वपूर्णा वर्तते । यज्जतः दिनचर्याक्रमो निरामयस्य परमं सोपानमिति स्वीक्रियते। कालानुगुणं विधीयमाना क्रिया सुसम्पन्नं भवति चेत् जनजीवनं ससुखं तिष्ठति, न भवति चेत्तर्हि विविधाः समस्याः सम्मुखीभवन्ति । एवं क्रमभङ्गस्य बाहुल्येन शनैः शनैः अनागतानां अपिरिचितानां आमयानां परिचयः खेदकरो भवति, यत्तु प्रत्यक्षं सर्वैरनुभूयते एव। अतः सामाजिकानां सुन्दरस्वास्थ्यप्रवृत्तौ सुदीर्घायुरसाधनाय च दिनचर्यायां चरकादीनां विविधव्यवस्थालोडनमित्ययं शोधाख्यो महासङ्कल्पः।*

**कूटशब्दाः -** **आयुर्वेदः, दिनचर्या, आयुर्वेदे दिनचर्या**, आचाररसायनम्, **अवधेयांशः**, उपसंहारः।

**प्रस्तावना** - शारीरिक-मानसिकपुष्टिसाधनार्थं सन्तृप्त्यर्थं च खाद्य-पेय-आचरण-शौच-सन्तोष-शयन-प्रमादनादिव्यवस्था मानवानां कृते अनिवार्या भवति। दैनन्दिनजीवनप्रक्रियायाम् आहार-विहार-आचारादीनामावश्यकता लोके सर्वैरनुभूयते एव। यदेतेषां विना सकलोऽपि जीवः सचराचरश्च असम्भवप्राण इति ज्ञायते। यथा अस्माभिः कालानुपानं भोजनं-पानीयं न क्रियते चेत् अग्निमान्द्याद्युदरपीडा जन्यते। पुनः अपानवायुः अशान्तो भूत्वा गुदेऽपानमिति संज्ञां व्यतिक्रम्य शरीरे बहुमुखीक्लेशस्य कारणं भवति। तस्मात् शरीरे बहुमुखीक्लेशस्य उपशमनार्थं शास्त्रोपदिष्टदिनचर्या परमावश्यकी । नियमितकार्यशैलीद्वारा आयुर्वेदः जनानां स्वास्थ्यसम्पदां सुरक्षामादिशति । न केवलं मानवानां कृते, अपि तु पशु-पक्षी-स्थावर-जङ्गमादीनां समेषां स्वस्थवृत्तं पुरस्कृत्य आयुर्वेदो दिनचर्यां विदधाति । यतोहि पुरुषार्थचतुष्टयसाधनं भवति प्राणिप्रत्येकस्य लक्ष्यम् । स्वस्थवृत्तं विना यत्र लक्ष्यते। स्वस्थेनाधिकारिणा शास्त्रोक्तकर्मसम्पादनेन चतुर्वर्गफलप्राप्तिसम्भवात्, स्वस्थवृत्तस्य विशिष्टा शाखा भवति दिनचर्या। अतः आयुर्वेदे उपदिष्टा दिनचर्या नियततो अध्येतव्या, पालनीया च ।

❖ **आयुर्वेदः**- आयुर्वेदयतीति आयुर्वेदः। आयुषो वेद आयुर्वेदः। आयुर्वेद्यते ज्ञायते अनेनेत्यायुर्वेदः। आयुर्वेत्त्यनेन चिह्नज्ञापनेन। आयुः शरीरेन्द्रियसत्त्वात्मसंयोगः, तदस्मिन्नायुर्वेदे विद्यते अस्तीत्यायुर्वेदः। आयुर्विद्यते विचार्यते अनेन वा इत्यायुर्वेदः। आयुर्वेदयतीत्यायुर्वेदः। आयुरनेन विन्दति प्राप्नोति इति वा आयुर्वेदः। आयुर्वेदयति ज्ञापयति प्रकृतिज्ञानरसायनदूतारिष्टा-द्युपदेशादित्यायुर्वेदः।

एतीत्यायुः। सन्ततं यातीत्यर्थः। एवंविधं गत्वरस्वभावमपि हिताहारविहारसेवादिभिः अहितवर्जनेन च कथमेतत् स्थिरीभवेदित्येवं कामयन्ते ये ते आयुष्कामाः। तेभ्यो हित आयुष्कामीयः। आयुष्कामयमानैः पूर्वमन्विष्य सर्वप्रथमं दृष्टत्वादयम् आयुष्कामीयाध्यायः। अध्यायेऽस्मिन् चरको महर्षिः शरीरेन्द्रियसत्त्वात्मसंयोग आयुरिति लक्षयति -

**शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्। नित्यगं चानुबन्धं च पर्यायैरायुरुच्यते ।।**[1]

इण् गतौ इति धातोः उसि णिच्च योगे आयुस् शब्दो निष्पद्यते। तेन विद्-लृ लाभे घञ् प्रत्ययकृते आयुर्वेदः निष्पद्यते। स्वयं चरकमहर्षिरपि ब्रूते –

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।**
**मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ।।**[2]

इत्येतावता निरुक्तयो व्युत्पत्तयश्च आयुर्वेदस्य महत्त्वं ज्ञापयन्ति। आयुर्वेदो मुख्यमाकर्षणद्वयं प्रस्तौति। स्वस्थानां रक्षणं स्वास्थ्यं, रुग्णस्वास्थ्यसंरक्षणम्। सायुषः वृद्धिहेतुत्वं दीर्घजीवप्रकाशनम् इति। यथा संहिताग्रन्थेषु स्वाभाविकतया स्वस्थवृत्तस्य विचारः प्रथमं क्रियते, तदनु व्याधीनां विचारक्रमः। अतस्तद्धेतोः लिङ्गज्ञानं-हेतुज्ञानम्-औषधज्ञानमिति तत्त्वत्रयम् आयुर्वेदे मौलिकत्वमेति। एतेषां सदुपयोगेन प्रकृष्टायुस्सिद्धत्वाद् एव आयुर्वेदस्य आयुर्वेदत्वमिति मानम् ।

**रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान्।**
**औत्सुक्यमोहारतिदाञ्जघान योऽपूर्ववैद्याय नमोस्तु तस्मै।।**[3]

परमर्षिणा वाग्भट्टेन एवंविधोऽभिमतनमस्कारश्लोकः रोगोपशान्तिस्तथा आयुः कामयमानेन धर्मार्थसुखसाधनमिति आयुर्वेदस्य प्रमुखं प्रयोजनमिति प्रतिपादयति।

❖ **दिनचर्या** – चरणं चर्या इति निरुक्त्यनुसारं दिने दिने चर्या दिनस्य वा चर्या दिनचर्या इत्युच्यते। उभयलोकहितमाहार-विहारचेष्टितमिति यावत्, प्रतिदिने यत्कर्त्तव्यम्। वैदिकवाङ्मये वेदमन्त्राणामध्ययनाद् ज्ञायते यद्वैदिकमहर्षय आचार-विचारादीनां महत्त्वं बहवाधिक्येन सम्मानितवन्तः। एवमेव गृह्यसूत्र-धर्मसूत्रेषु च तत्तच्छास्त्राध्यायिभ्यः मधुरजीवनमुद्दिश्य विविधाचारा अभिहिताः। नैकशाखोपदिष्टत्वात् तत्राचरणे ब्राह्मण-कल्पभागेषु प्रशंसा विधीयते । तैत्तिरीयोपनिषद्यपि शिक्षाध्याये आचारचर्या समुपदिष्टास्ति। मनु-याज्ञवल्क्यादिस्मृतिकाले विशिष्य ब्रह्मचारी तथा राजानमुद्दिश्य विशिष्टा दिनचर्या निर्दिष्टा वर्तते । पुराणसाहित्येषु वंशपरम्परानुसारी दिनचर्या महाभारतादिषु परिलक्ष्यते ।

---

1 च.सू.1.42
2 च.सू.1.41
3 अष्टाङ्गहृदय.सूत्रस्थानम्

बौद्धधर्मावलम्बिनो दृढाचारानुशालिन आसन् । जैनधर्मानुयायीनामपि सात्विकनिराडम्बरानुशासने सूर्येण सार्कं सम्बद्धा तेषां दिनचर्या विशिष्टोत्कर्षा वर्तते । विशिष्य आयुर्वेदे सकलप्राणीनामायुः स्वास्थ्यधर्मार्थकाम-सुखसन्तोषादींश्चाभिलक्ष्य प्रकृति-दोष-गुण-काल-सामर्थ्यादींश्च विचार्य जनसमुदायस्य कृते दिनचर्या समुपदिष्टा वर्तते । न केवलं मनुष्याणां कृते, अपि तु पशुपक्षीस्थावरजङ्गमादीन् संपरीक्ष्य चरकादिमहर्षयो दिनचर्यायाः सार्वजनीनोपदेशं कृतवन्तः।

❖ **आयुर्वेदे दिनचर्या** – वैद्यशास्त्रे प्राथम्येन चरकसंहिता, सुश्रुतसंहितेति द्वे स्रोतसि यत्र मानवानां स्वास्थ्यरक्षामुद्दिश्य दिनचर्या उपदिष्टा वर्तते । वाग्भटमहर्षेः **अष्टाङ्गसङ्ग्रहे** स्वातन्त्र्येण दिनचर्या इत्येकोऽध्यायः छन्दोबद्ध आकृष्टशैल्या प्रतिपादितः। **अष्टाङ्गहृदये** चापि सूत्रस्थाने दिनचर्याध्यायनाम्ना स्वतन्त्रोऽध्यायो गद्यपद्यमयेन सुष्ठु व्याख्यातः । धीमता भोजभूपेनापि **चारुचर्या** इति स्वतन्त्रो ग्रन्थः प्रणीतः। आधुनिककालेऽपि संस्कृभाषायामनुरागं प्रदर्श्य जनानामारोग्यं दीर्घायुष्यञ्च मनसि निधाय वैद्यप्रवरेण के. एम्. महेशकरवर्येण कृतं **स्वस्थवृत्तम्**, सम्प्रति आयुर्वेदवैद्यानां यदत्यन्तं रुचिकरं सहाय्यप्रदञ्च वर्तते । दत्तरामपाठकनिर्मितः **चर्याचन्द्रोदया**ख्यग्रन्थोऽपि दिनचर्याप्रसङ्गे महदुपादेयः। एवमेव वैद्यकीयसुभाषितमित्यादि नैके प्रसिद्धायुर्वेदग्रन्थाः दिनचर्याप्रसङ्गमुद्धृत्य प्रथिताः वर्तन्ते । ननु विचारणीयं भवत्यत्र विषयस्यास्य आरोग्यकाम-आयुष्कामपुरुषैः कः सम्बन्धः, किं वा प्रयोजनम् ? तदुच्यते - यस्मादायुष्कामेण पुरुषेण यत्प्रधानमायुष्यं तदासेव्यं, प्रथमतः तदन्वन्यानि यान्यायुष्याणि । अत आदौ तावत् आचारप्रधानेन भवितव्यम् । यत **आचारादायुर्लभ्यते** इति आचार्याः प्रवदन्ति । यद्यपि आयुर्वेदे रात्रिचर्या अपि विहिता वर्तते, तथापि दिवसे चारणबाहुल्यादत्र प्राधान्येन दिनचर्या प्रतिपाद्यते ।

प्रायशः सर्वे जानन्तीयं दिनचर्या प्रातः जागरणात् आशयनं यावत्क्रियमाणं कर्म एव । कर्ममयजीवने मानवः स्वाङ्गसौष्ठवतां दृष्ट्वा सामर्थ्यानुगुणं कर्माणि आजीवनमनुतिष्ठति । आरोग्यवतो जनस्य एतादृशानि कर्ममयशतवर्षाणि स्वाभाविकी जीवितावधिः कथ्यते । आमृत्योरारोग्यवान्भवितुमिच्छुना प्रतिदिनमारोग्यवान् भवितव्यमेव । एषा खलु नरशरीरस्य प्राकृतिक्यावश्यकता, सुसंस्कृते समाजे आत्महितसिद्ध्यर्थं तस्य यान्यावश्यककर्माणि सम्यगाधाय निर्वर्तिताशेषदिनचर्यामविलम्ब्य अवश्यं तिष्ठेत् । आरोग्यवता नरेण ब्राह्मे मुहूर्ते समुत्थाय प्रथमतो मुखमार्जनशौचक्रियादि शरीरकृत्यानि सम्पादयितव्यानि भवन्ति । यः काल उषाकालो ब्राह्ममुहूर्तो वेति नाम्ना सूर्योदयेन सहैव प्रतीयते । वस्तुतस्तु सूर्योदयात् एव

जगदुदय इति प्रसिद्धमेव। अतः सत्यमिदमङ्गीकृत्य अष्टाङ्ग-हृदयकर्त्रा ब्रह्ममुहूर्ते[4] हि शय्यात्यागः उपदिष्टः–

**ब्राह्मे मुहूर्त उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः।**[5]

चर्याचन्द्रोदयाख्ये ग्रन्थे आयुःरक्षणार्थं प्रातः काले जागरणप्रसङ्गः समाजाय महदुपदेशः। तद्यथा -

**ब्राह्मे मुहूर्ते बुद्ध्येत स्वस्थो रक्षार्थमायुषः।**
**तत्र सर्वाघशान्त्यर्थं स्मरेच्च मधुसूदनम्।।**[6]

अपि च – पूर्वोक्तब्राह्मे मुहूर्ते उत्थायाचम्येष्टदेवतां नमस्कृत्य प्रातःस्मरणं विधाय रविं गुरुन्नमस्कृत्य अग्रे नियमान् उपदिशति। अस्य विधेः दिव्यमुदाहरणं रामायणे दृश्यते –

**प्रातकाल उठि कै रघुनाथा। मातु पिता गुरु नावहिं माथा।।**[7]

तदग्रे मलत्यागादीनां प्रातःक्रियत्वं संसूच्य तेन आयुर्विवर्धनं सूचयति -

**आयुष्यमुषसि प्रोक्तं मलादीनां विसर्जनम्।**
**तदंत्रकूजनाध्मानोदरगौरववारणम् ।।**[8]

एवमेव कषायकटुतिक्तमधुररसप्रायाणि मृदुनि वृक्षशाखाग्राणि दन्तकाष्ठानि, सुष्ठुतया चर्वयित्वा तेनैव दन्तमांसान्यपीडयन् दन्तगतमलशोधनं नितान्तं कर्त्तव्यमिति, तदुद्दिश्य शास्त्रविहितानि दन्तकाष्ठानि द्वादशाङ्गुलपरिमितानीति उल्लिखितानि –

**वटनासार्कखदिरकरञ्जकरवीरकम्।**
**सर्जारिमेदापामार्गमालतीककुभोद्भवम्।।**[9]

अपि च कानिचित् वर्जनीयानि काष्ठान्यपि सूचितान्यत्र –

**नैव श्लेष्मातकारिष्टबिभीतधवधन्वजान्।**
**बिल्ववञ्जुलनिर्गुण्डीशिग्रुतिल्वकतिन्दुकान्।।**

4 "[illegible] मुहूर्तो ब्राह्म" इति टीकाकारो हेमाद्रिः [illegible] ब्राह्म(ब्रह्ममुहूर्त) इति [illegible]
5 अ.हृ.सू.2.1
6 चर्याचन्द्रोदये दिनचर्यानिर्णये [illegible], पृ.-57
7 बालकाण्ड.205
8 चर्याचन्द्रोदये दिनचर्याध्याये शौचवर्णनं
9 अ.हृ.सू.3.12,13

**कोब्दारसमीपीलुपिप्पलेङ्गुदगुग्गुलून्।**
**पारिभद्रकमम्लीका मोचक्यौ शाल्मलीं शणम्।।**[10]

एवमेव विशिष्य पलाशविषये अपि कथयन्ति –

**पालाशमासनं दन्तधावनं पादुके त्यजेत् ।**[11]

अपि च मनुः देवतानां पूजनमुक्त्वा विशेषेण मैत्रमिति पदं प्रातः क्रियत्वेन सूचयति यथा –

**मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम्।।**

इत्यत्र मित्र नाम सूर्यः, मित्रसम्बन्धो मैत्रः तं, मैत्रमिति पदेन सूर्याराधनमित्यर्थं विशेषेण उपदिशति। पुनश्च देवतानां च पूजनमिति गम्भारयति ।

**व्यायामः** – शरीरस्य अभ्युन्नतये वर्चः(कान्ति)समुन्नतये, रोगनिराकरणे तथा वयोरूपगुणैर्हीनोऽपि सुरूपदर्शनाय व्यायामो नित्यसेव्यो भवति । एवं नित्यव्यायामेन विरुद्धमपि भोजनं विदग्धमविदग्धं वा निर्दोषं पचति । एवमनेके गुणा व्यायामस्य कथिताः। अतः प्रातःक्रियासु व्यायाम आयुर्वेदे निर्दिष्टः। तत्र व्यायामस्य लक्षणमेवं विहितमस्ति –

**शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धिनी ।**
**देहव्यायामसंख्याता मात्रया तां समाचरेत् ।।**[12]

**स्वेदागमःश्वासवृद्धिर्गात्राणां लाघवं तथा ।**
**हृदयाद्युपरोधश्च इति व्यायामलक्षणम् ।।**[13]

अतिव्यायामस्य दुष्परिणाम उक्तः अष्टाङ्गहृदयग्रन्थे -

**तृष्णा क्षयः प्रतमको रक्तपित्तं श्रमः क्लमः।**
**अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ।।**[14]

**तैलाभ्यङ्गः** – व्यायामस्यानन्तरमेव तैलेन शरीरमर्दनं वरम् । तैलाभ्यञ्जनानन्तरं स्नानमुपदिष्टम् । प्रस्तुतकाले न जाने कियन्तो दोषाः प्रत्यक्षीक्रियन्ते जनैः तैलाभ्यञ्जनस्य निराकरणात् । केशसमस्या-चर्मसमस्यादि निवारणार्थं जनैः विविधा नूतनचर्या आसेव्यते । परन्त्वत्रायुर्वेदे तैलाभ्यञ्जनस्योपयोगः सविशिष्टमाह -

---

10 अ.हृ.सू. 3.18,20

11 अ.हृ.सू. 3.21

12 च.सूत्रस्थान 7.31

13 च.सूत्रस्थान 7.33(1)

14 अ.हृ.सू. 2.13

नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते ।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च॥
बलं शिरः कपालानां विशेषेणाभिवर्धते।
दृढमूलाश्च दीर्घाश्च कृष्णाः केशा भवन्ति च ॥
इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम् ।
निद्रालाभः सुखं च स्यान्मूर्ध्नितैलनिषेवणात् ॥
स्नेहाभ्यङ्गाद्यथा कुम्भश्चर्म स्नेहविमर्दनात् ।
भवत्युपाङ्गादक्षश्च दृढक्लेशसहो यथा ॥
तथा शरीरमभ्यङ्गाद्दृढं सुत्वक् च जायते ।
प्रशान्तमारुताबाधं क्लेशव्यायामसंसहम्॥
सुस्पर्शोपचिताङ्गश्च बलवान् प्रियदर्शनः।
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजर एव च ॥[15]

सौगन्धिकाङ्गरागस्य शरीरे विलेपनम् सततमेवोपयोक्तव्यं भवति । यतस्तत् लाभदायकं भवति । अभ्यञ्जनेन वातदोषहरणं, कफदोषहरणं मेदसः प्रविलापनम्, अङ्गानां स्थिरीकरणम्, त्वचः प्रसादकरं शुक्लीकरणमित्यादि लाभा भवन्ति । प्रत्यहं शिरसि तैलं निर्लिपेत् । यतोहि तैलं भवति केशानां भोजनम् । शिरसि नित्यतैलव्यवहारेण खालित्यं, पालित्यं, शिरःशूलं, केशपतनं, धवलं, रुक्षं, नष्टश्च न भवति । केशाः दृढमूलाः, दीर्घाः, कृष्णाः, स्निग्धाश्च भवन्ति । स्नानात् प्राक् शरीरे तैलाभ्यञ्जनं चरकेन इत्थं प्रत्यपादि । तदनु स्नानमुच्यते । स्नानं नित्यम् एकवारं तु कर्त्तव्यमेव । आयुर्वेदे स्नानेन शरीरपवित्रेण सार्कं बहुविधलाभा उक्ताः –

दौर्गन्ध्यं गौरवं तन्द्रां कण्डुं मलमरोचकम्।
स्वेदबीभत्सतां हन्ति शरीरपरिमार्जनम्॥
पवित्रं वृष्यमायुष्यं श्रमस्वेदमलापहम् ।
शरीरबलसन्धानं स्नानमोजस्करं परम् ॥[16]

महर्षिवाग्भटोऽपि एतन्मतं समर्थयन् उष्णाम्बुस्नानस्य फलं पुनराह –

उष्णाम्बुनाऽधः कायस्य परिषेको बलावहः।
तेनैव तूत्तमाङ्गस्य बलहृत्केशचक्षुषाम्॥[17]

अर्थात् उष्णाम्बुना अधःकायस्य परिषेको बलावहः, पुनः उत्तमाङ्गं नाम शिरसि कृते परिषेके केशचक्षुषां कृते बलकारी भवति ।

---

15 च.सं.सू.5.89
16 च.सं.सू.5.93-94
17 अ.हृ.सू.2.17

**अन्नसेवनम्** – अन्नसेवनं तु नियतवेलायां कर्त्तव्यमेव । यथोच्यते – शतं विहाय भोक्तव्यमिति । यतोहि अन्नसेवनेन तत्क्षणमेव शरीरे बलसञ्चारो भवति । पुनः उत्साहः-चेष्टाशक्तिर्वर्धते आरोग्यं सुस्थाप्यते च। अन्नरसैः हि प्राणः सुरक्षितो भवति । मनःशरीरयोः सर्वापि क्रिया तदाश्रित्य एव नियमतः कार्याणि कुर्वन्ति, येन जीवः सुस्थः इति कथ्यते । देश-काल-प्रकृति-संयोगादीन् विचार्य च भोजनं स्वीकर्त्तव्यम् । यस्मात् भोजनात् नरस्य प्रकृतिः प्रभवति अतो मनसः सदसत्प्रवृत्तिः विचार्य एव सात्विकाद्याहारव्यवस्था आचरणीया भवति । महर्षिवाग्भटः समुपदिशति जीर्णे हितभोजनम् -

> **जीर्णे हितं मितं चाद्यान्नवेगानीरयेद्बलात् ।**
> **न वेगितोऽन्यकार्यः स्यान्नाजित्वा साध्यमामयम्।।**[18]

जीर्णे(सम्यक्परिणते)पूर्वं आहारे, जीर्णयोग्यं मात्रया युक्तं भोजनम् अद्यात् । हितमपि भोजनम् अतिमात्रं हीनमात्रं वा दोषाय स्यात् । अतो मितं नाम मात्रयैव ग्रहणम्।

महर्षिचरकः शरीरस्थाग्निबलं विचार्य मात्राप्रमाणं भोक्तव्यमिति आह –

**यावद्ध्यस्याशनमशितमनुपहत्य प्रकृतिं यथाकालं जरां गच्छति तावदस्य मात्राप्रमाणं वेदितव्यं भवति** ।[19]

**निद्रा** – आयुर्वेदे निद्रायाः प्रकाराः अनेके उक्ताः। तेषु या रात्रिस्वभावप्रभवा सर्वभूतानां जीवितसंरक्षिणी कथ्यते । उपयुक्तकाले समायाता नियतवृत्तिस्वरूपा निद्रा नरस्य सुखस्यार्थे अत्यन्तावश्यकी भवति । सा च अपरं जीवितं तस्य । यदा नरेणासीनप्रचलायितस्वरूपिणी निद्रा सेव्यते दिवसे रात्रौ वा कस्मिन्नपि काले तदा सा नापचयं नोपचयं प्राप्नोति । यद्यपि निद्रा रात्रावेव भोक्तव्या भवति तथापि निसर्गक्रमेण दिवाऽपि भोक्तव्या भवति कैश्चित्कैश्चिज्जनैः। ते यथा – अजीर्णिनः, क्षतक्षीणाः, वृद्धाः, बालाः, स्त्रियः, अतिसारिणः शूलार्ता वा, श्वासिनः, हिक्किनः, कृशाः, उच्चैःस्थितात्स्थानात्पतिताः लगुडप्रहारैर्वा जर्जरीकृताः, उन्मत्ताः, यानप्रजागरैः क्लान्ताः, क्रोधशोकभयक्लान्ताः। एवं दौर्बल्यमापन्नैर्नरैर्दिवा निद्रा सेव्या भवति । किन्तु यदि ते ग्रीष्मवर्जेष्वृतुषु दिवानिद्रां शीलयन्ति तदा तेषां पित्तकफौ परमं मोक्षं प्राप्नुतः। अतो दिवानिद्रा निषिद्धा वर्तते ।[20] विशेषतः साम्प्रतिककाले निद्रानाशे मुख्यं कारणं भवति नित्यव्यवहार्य दूरवाणी सङ्गणकश्च। जीवनसहायकत्वेन सर्वैः यदादिनं व्यवह्रियते । सम्भवतो रात्रौ शय्यायां दूरभाषा करे नित्यं निद्राकालसहायिनीति मात्राधिक्योपयोगो विरमति चेत् यथेष्ट सुखनिद्रा ब्राह्ममुहूर्ते परिपूर्णा भवितुमर्हति । एतादृशो विचारो विदुषः स्वात्मन्यैव विचारयन्तु ।

---

18 अ.हृ.सू.2.19

19 च.शा.सू.5.4

20 [illegible] पृ-157

**आचाररसायनम्** – आचारो नाम शिष्टानुमतो व्यवहारः। रसादीनां धातूनाम् अयनमाप्यायनरूपं(वृद्धिः) रसायनम् । अर्थात् येन शिष्टव्यवहारेण शरीरस्थरसा विवर्धन्ते रोगान् अपगच्छन्ति च तदाचाररसायनमिति । अस्माकं जीवने आहार-विहारादींश्च अतिरिच्य आचारस्यापि महान् प्रभावः दरिदृश्यते । *तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः*[21] इति महर्षिर्मनुरपि स्मारयति । विशेषेण वैद्यवाग्भतः दिनचर्याध्याये आत्मवत्सततं पश्येत्, जीवे दया, सर्वभूतेभ्यः कल्याणम्,पकारः, भक्तिः, मैत्र्यादि आचारस्य महत्प्राधान्यं द्योतयति । सांख्यदर्शनादिषु अहिंसासत्यमस्तेयब्रह्मचर्य अपरिग्रहास्तथा शौचसन्तोषस्तपस्स्वाध्याय ईश्वरप्रणिधानादीनि या विशिष्टाचारव्यवस्था चरकेन आचाररसायने आविष्कृता । एतदाचाररसायनम् हि दिनचर्यायाः अन्यतमं सोपानं भवति । विशेषेणात्र सत्यम्, अक्रोधनः, मिथुननिवृत्तिः, अहिंसा, प्रियवचनम्, शौचपरत्वम्, देवार्चनं, गोपूजा, ब्राह्मणसेवा, गुरुभक्तिः, वृद्धसेवा, आनृशंस्यम्, करुणा, धर्मगामीत्यादि विषया लभन्ते ।[22] मिथुननिवृत्तेः उदाहरणं यथा दृश्यते -

**न हीदृशमनायुष्यं लोके किञ्चन विद्यते।**
**यादृशं पुरुषस्येह परदारोपसेवनम् ।।**[23]

**न दिवा मैथुनं गच्छेन्न कन्यां न च बन्धकीम् ।**
**न चास्नातां स्त्रियं गच्छेत्तथायुर्विन्दते महत् ।।**[24]

आचाररसायनेन विना पदार्थरसायन(क्षीर-च्यवनप्राशादि)सेवनेन तस्य कृत्स्नं फलं न सम्भवति, तस्माद् आचाररसायनस्य फलमुच्यते -

**गुणैरेतैः समुदितैः प्रयुङ्क्ते यो रसायनम् ।**
**रसायनगुणान्सर्वान् यथोक्तान्स समश्नुते ।।**[25]

❖ **अवधेयांशः – समयोगश्चारोग्यकरः।**[26]

काल-अर्थ-उपदिष्ट कर्म इत्येतेषां विधिवत् देशः, बलं, अवस्था, कालं, युक्तिरिति विचार्य यदाचरणं ही भवति मुख्य जीवनस्य प्रधानं सूत्रम्। एतत् सम्यक् परिपाल्य बहुमूल्यजीवनं संरक्षेत्।

---

21 मनुस्मृतिः.2.18
22 चरकसंहिता,चिकित्सास्थानम्,1.4.30-34
23 महाभारतम्,अनुशासनपर्व.107.20
24 महाभारतम्,अनुशासनपर्व.107.100
25 चरकसंहिता,चिकित्सास्थानम्,1.4.35
26 आयुर्वेदसूत्रम्.1.12

## ❖ उपसंहारः –

जागतिकप्रक्रियायां पर्यायबद्धः एषो य आचरणक्रमः दिनचर्या इति शब्देन ज्ञायते। तस्यां चर्यायां भोजन-शयन-जागरणादिषु व्यतिक्रमो भूत्वा अद्य मानवानां शरीरे मनसि हृदि च काले काले असौष्ठवं परिलक्ष्यते । विशेषतया युवानो यथावृद्धः शिथिलीभवन्ति । एवमेव नैके व्यतिक्रमाः शरीरे आधि-व्याधिजनने प्रधानकारणानि भवन्ति । आयुर्वेदाध्ययनेन सुस्पष्टमिदं यत्र केवलमौषधसेवनेन आरोग्यं न वा कियत्कालसावधानेन स्वस्थवृत्तत्वमिति, अपि तु नियमितानुकूलदिनचर्यया ह्येवारोग्यं, दीर्घायुष्यञ्च सम्भविष्यति । ध्यानेन, अध्यात्मचिन्तनेन च मानसिकविकारा अपगच्छन्ति । अतो लोकेऽस्मिन् सर्वेऽपि प्राणिनः स्वजीवनरथं सम्यक् चालयितुं यथाकालं सानन्दमाहार-विहारादींश्च सम्पाद्य अध्यात्मदर्शनेन ऐश्वरीयशक्तिमनुभवेयुः। स्वजीवनसंरक्षणेन आत्मजानाम् इतरेषाञ्च मानसिकचापं निराकुर्युः। सुष्ठुप्रचलितेन तेन प्रधानेन साकम् अङ्गानां स्वास्थ्यं सुन्दरं सुरक्षितं प्रफुल्लितं च सम्भविष्यतीति शम्।

॥ ॐ शान्तिः शान्तिः शान्तिः॥


<u>सन्दर्भग्रन्थाः -</u>

**अष्टाङ्गहृदयम्** : अण्णा मोरेश्वर कुण्टे, वाराणसी,चौखम्बा संस्कृत संस्थान,2015।

**आयुर्वेदसूत्रम्** : रामप्रसादशर्मा, मुम्बई, श्रीवेङ्कटेश्वरप्रेस्, 1966 ।

**चरकसंहिता**, जादव त्रीकमजी, वाराणसी : चौखम्बा संस्कृत संस्थान2004।

**चर्याचन्द्रोदयः** : लक्ष्मीवेङ्कटेश्वरः, मुम्बई, कल्याण मुद्रणालय, 1958।

**चारुचर्या** : भोजराज, नई दिल्ली, केन्द्रीय आयुर्वेद एवं सिद्ध अनुसन्धान परिषद्, 2000।

**मनुस्मृतिः** : केशव किशोर कश्यप,हिंदीटीका-हरगोविन्दशास्त्री,वाराणसी,चौखम्बा कृष्णदास अकादमी,2007 ।

**महाभारतस्य आयुर्वेददृष्ट्या अध्ययनम्** : चन्द्रकान्त बाजीराव कुलकर्णी, देहली, राष्ट्रियसंस्कृतसंस्थानम्, 2007।

**माधवनिदानम्** : सुदर्शनशास्त्री, वाराणसी, चौखम्बा संस्कृत संस्थान, 1982।

**श्रीरामचरितमानस** : हनुमानप्रसाद पोद्दार, गोरखपुर, गीताप्रेस,2063संवत् ।

**सुश्रुतसंहिता** : जादवजी त्रिकमजी आचार्य, वाराणसी, चौखम्बा संस्कृत संस्थान, 2009।

**स्वस्थवृत्तम्** : के एन्. महेशकर, मुम्बई, निर्णयसागर प्रेस्, 1954।

AYURVEDA ENCYCLOPEDIA(Part -1) : Hyderabad, National Institute of Indian Medical Heritage. 2013.

## ध्वन्यालोकलोचनं प्रति काव्यतत्त्वविज्ञानां दृष्टिः

डॉ.अरविन्द कुमार पाण्डेय

- **परिचयः –**

अभिनवगुप्तः आनन्दवर्धनविरचितस्य 'ध्वन्यालोक' इत्याख्यस्य ग्रन्थस्य 'लोचनम्' इत्याख्यायाः टीकायाः कर्ता अस्ति। अभिनवगुप्तस्य प्रभावः तदुत्तरवर्तिषु बहुषु आचार्येषु महान् आसीत्। बहवः आलङ्कारिकाः लोचनसमर्थकाः। यद्यपि न सर्वे विद्वांसः लोचनमतं समर्थयन्तो दृश्यन्ते, तथापि ये विरोधिनः तेषामपि ग्रन्थेषु लोचनचर्चया ज्ञायते यत् तत्रापि कश्चन प्रभाव आसीदेव। ध्वन्यालोकलोचने अभिनवगुप्तपादस्य बहवः स्वोपज्ञाः विचाराः सन्ति। इयं लोचनव्याख्या नैकत्र ध्वन्यालोकग्रन्थं सम्यक् योजयति। केषाञ्चित् स्थलेषु अभिनवगुप्तः ध्वन्यालोकग्रन्थम् अन्यथा अपि व्याख्यातवानिति बहूनां विमर्शकानां मन्तव्यं वर्तते। अतश्चतद्विषये कश्चन विमर्शस्य आवश्यकता प्रतिभाति। प्रकृतनिबन्धे ध्वन्यालोकलोचने व्याख्यातानाम् अभिनवगुप्तस्य केषाञ्चन स्वतन्त्रकाव्यशास्त्रीयसिद्धान्तानां विविधव्याख्यातृदृष्ट्या परीक्षणं करिष्यमाणं वर्तते। ततः प्राक् ध्वन्यालोकस्य तथा लोचनटीकायाः संक्षिप्तपरिचयः प्रस्तूयते।

**ध्वन्यालोकः लोचनश्च -**

'ध्वनिकार' इत्युपाधिं प्राप्ताः ध्वन्यालोककर्तारः आनन्दवर्धनाचार्याः काव्यशास्त्रीयाचार्येषु अभ्यर्हिततमाः सन्ति। एभिः ध्वन्यालोकग्रन्थे ध्वनिसिद्धान्तं व्यवस्थाप्य काव्ये नूतनो मार्गः दर्शितः। ध्वन्यालोके 'उद्योत' इति संज्ञिताः चत्वारो विभागाः सन्ति। ग्रन्थोऽयं कारिका, वृत्तिः, उदाहरणम् इति रूपेण रचितो विद्यते। कारिकार्थविस्फोरणाय केचन परिकरश्लोकाः अप्यत्र प्राप्यन्ते। अत्र कारिकाभागस्य वृत्तिभागस्य च कर्ता एक एव उत भिन्नः? इति विषये समालोचकानां मतैक्यं नास्ति। तत्र केचन स्वीकुर्वन्ति यत् कारिकाभागः अन्येन रचितः, वृत्तिभागः आनन्दवर्धनेन एवञ्च बहवः स्वीकुर्वन्ति यदुभयोः कर्ता एक एव। पण्डितसमाजेऽपि कारिकाकारः वृत्तिकारश्च आनन्दवर्धन इति प्रसिद्धिर्वर्तते। काव्यशास्त्रपरम्परायाम् अभिनवगुप्तः, मम्मटः, हेमचन्द्रः, विश्वनाथः, जगन्नाथादयो नैके प्रामाणिकाः काव्यतत्त्वविज्ञाः ध्वन्यालोकसिद्धान्तं समर्थयन्ति। महिमभट्टप्रभृतयः केचन आचार्याः आनन्दवर्धनप्रतिपादितसिद्धान्तं न सहन्ते। खण्डनमण्डनपरम्परायां सत्यामपि अद्यापि ग्रन्थस्यास्य महत्त्वं सर्वैः स्वीक्रियते।

---

[1] अत्र प्रसङ्गे राजशेखरो वदति – ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना। आनन्दवर्धनः कस्य नासीदानन्दवर्धनः।।

ध्वन्यालोकरहस्यं प्रकाशनाय अभिनवगुप्ताचार्यैः 'लोचनम्' इत्याख्या सुप्रसिद्धा टीका व्यरचि[1]। आनन्दवर्धनात् प्रायः सार्धैकपञ्चाशत् वर्षानन्तरं प्रादुर्भूतः ध्वन्यालोकस्य व्याख्याकारोऽयम् अभिनवगुप्तः प्रत्यभिज्ञादर्शनस्य प्रख्याताचार्यः, काव्यशास्त्रमूर्धन्येष्वन्यतमः, प्रशस्तकविश्च वर्तते। यद्यपि नायं कस्यचिदपि स्वतन्त्रकाव्यशास्त्रीयग्रन्थस्य लेखकः तथापि नाट्यशास्त्रस्य 'अभिनवभारती' इति व्याख्यया, लोचनव्याख्यया च नैकान् नूतनान् सिद्धान्तान् काव्यमार्गे आविष्चकार। आचार्येणानेन आदौ लोचनव्याख्या निर्मिता ततः नाट्यशास्त्रोपरि अभिनवभारती इति स्वीकुर्वन्ति विपश्चिदः। अभिनवगुप्तस्य लोचनव्याख्याविषये एका भणितिः प्रसिद्ध्यति लोके –

**'किं लोचनं विना लोको भाति चन्द्रिकयापि हि।**
**तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्।।'**[2] इति।

- **ध्वन्यालोकलोचनस्य प्रसिद्धानि संस्करणानि –**

ध्वन्यालोकलोचनस्य नैकानि संस्करणानि वर्तन्ते। तान्यधारीकृत्य आचार्यश्रीरेवाप्रसादद्विवेदिना 'अभिनवगुप्ताचार्यलोचनसमेधितः ध्वन्यालोकः' इति ग्रन्थः प्रकाशितः। तत्र हि लोचनस्य 10 संस्करणानां विवरणं वर्तते[3]। संस्करणमिदम् अत्यन्तं समीचीनं वर्तते। अत्र पूर्वप्रकाशितानां ग्रन्थानामपि पाठः टिप्पण्यां प्रदत्तो वर्तते येन अध्ययने अनुसन्धाने च सौकर्यं भवति। अस्य संस्करणस्य मुख्यः आधारः 'पं. रामषारमिश्रटीकोपेत-लोचन-सहितं श्रीमहादेवशास्त्रिचरणैः सम्पादितं काशीस्थकाशीसंस्कृतसीरीजग्रन्थमालायाः 135 पुष्पतया 1940 खीष्टाब्दे प्रकाशितं संस्करणम्' इत्यस्ति। अत्र चत्वारि परिशिष्टान्यपि योजितानि सन्ति। तत्र चतुर्थं परिशिष्टम् अस्ति – 'ध्वन्यालोकवृत्तावुद्दिष्टाः काव्यशास्त्रिणः' इति। अस्य परिशिष्टस्य विषये वक्तव्यमिदमस्ति यदत्र 'ध्वन्यालोकलोचने उद्दिष्टाः काव्यशास्त्रिणः' इति भाव्यम्। मन्ये सम्पादकस्य एषा एव भावना आसीत्। यतोहि तत्र काव्यशास्त्रिषु आनन्दवर्धनात् अर्वाचीनाम् अभिबगुप्तादीनाम् आचार्याणाम् अपि समुल्लेखो वर्तते। यद्यपि श्रीद्विवेदिनः सावधानतया ग्रन्थसम्पादने प्रवृत्ताः भवन्ति, तेषामयमेव उद्घोषोऽपि भवति यद् मम संस्करणे समे दोषाः अपसारिताः, अन्येषु दोषाः आसन् इति तथापि अनवधानवशात् दोषोऽत्र जात इति प्रतीयते।

---

1 यद्यपि 'लोचनम्' इत्यभिधया एव प्रसिद्धेयं व्याख्या किन्तु विभिन्नपाण्डुलिपिषु अस्याः 'सहृदयालोकलोचनम्' 'काव्यालोकलोचनम्' इति संज्ञाद्वयमपि प्राप्यते। परवर्तिभिः व्याख्यातृभिः अभिनवगुप्तः 'लोचनकार' इति नाम्ना स्मृतः। अतः 'लोचनम्' इत्येव संज्ञा प्रसिद्धिं गता। (द्रष्टव्यम् – पश्यन्ती, ध्वन्यालोकस्य भूमिकारूपा, पृ. 21 जगन्नाथपाठकस्य )

2 ध्वन्यालोकलोचने, प्रथमोद्योते, पृ. 171 ( प्रकाशहिन्दीव्याख्योपेतः ध्वन्यालोकः )

3 द्रष्टव्यम्, साहित्यशास्त्रसमुच्चयः द्वितीयो भागः, पृ. 10

- **लोचनसमर्थकाः आचार्याः –**

लोचनप्रशंसकाः केचन आचार्याः काव्यमार्गे लोचनमाहात्म्यं प्रदर्शयितुं लोचनस्य तुलना पातञ्जलभाष्येण सह कुर्वन्ति केचन च शाङ्करभाष्येण सह। अत्र कानिचन स्थलानि सङ्गृह्य प्रदर्श्यन्ते -

1. 'प्रौढं क्व लोचनं क्वाहं मन्दधीः' इति बालप्रियाटीकाकाराः। एतेन ज्ञायते सामान्यव्युत्पत्तयः तत्र सारल्येन न प्रविशन्ति।

2. ध्वन्यालोकस्य व्याख्याः अभिनवगुप्ताश्च इति बिन्दुमधिकृत्य आचार्यश्रीपट्टाभिरामशास्त्रिभिः लोचनविषये स्वाभिप्रायमित्थं प्रकटितम् –

**"एतेषु लोचनमधिकृत्य नास्माभिरधिकं वक्तव्यम्। लोचनमामूलचूडं यस्सम्यगधिगच्छति स एवालङ्कारिकगोष्ठीषु प्रथमगणनामर्हति। आनन्दवर्धनाचार्यैरुदिष्टे प्रत्यग्रे गम्भीरे सर्वाङ्गीणसुन्दरे च पथि च सञ्चरतां कवितल्लजानाम् आलङ्कारिकाणाञ्च लोचनमेकमेव सुमहत्साहाय्यमाचरति। विना लोचनेन केवलमालोकप्रकाशिते पथि ध्वनिमार्गं विहरन्तो महाकवयो भृशं क्लिश्येयुः। एतादृशं क्लेशं दूरीकर्तुमेवाभिनवगुप्तपादैर्लोचनं व्यरचि। अत्र चातिसरलया वचोभङ्ग्या, सर्वातिशायिन्या विषयोपपादनसरण्याऽतिवेलं विषयास्सूपपादिताः, खण्डितानि च वादिदन्तिनां मतानि, स्थिरीकृतश्चानन्दवर्धनाचार्यप्रवर्तितो ध्वनिमार्गः"[1] इति।**

3. आचार्यजगन्नाथपाठकेन ध्वन्यालोकं लोचनञ्चाधिकृत्य प्रकाशहिन्दीव्याख्या रचिता। अत्र भूमिकाभागे 'लोचनकार आचार्य अभिनवगुप्त' इति शीर्षकेन अभिनवगुप्तस्य परिचयः प्रदत्तः। तदनुसारेण व्याकरणे यथा महाभाष्यस्य स्थानमस्ति तथैव साहित्यशास्त्रे लोचनव्याख्यायाः स्थानं वर्तते[2]।

4. आचार्यरामसागरत्रिपाठिना अपि ध्वन्यालोकं लोचनञ्चाधिकृत्य 'तारावती' इति व्याख्या कृता। लोचनविषये तेषाम् इदम् अभिधानं वर्तते यद् – लोचनं साहित्यशास्त्रस्य महाभाष्यं वर्तते। लोचनम् एकत्र ध्वन्यालोकस्य दुरूहस्थलानि पूर्णरूपेण स्पष्टयति अपरत्र स्वतन्त्रविचारधारामपि प्रस्तौति[3]।

- **लोचनविरोधिनः विद्वांसः –**

1. अभिनवगुप्तः ध्वनिवादपोषकः। परञ्च अस्य साक्षाच्छिष्येण श्रीक्षेमेन्द्रेण ध्वनिवादः नाङ्गीक्रियते। अतश्च महिमभट्टः व्यक्तिविवेके ध्वनिप्रस्तावे अभिनवगुप्तस्य भ्रान्तत्वं निरूपयति[4]। एवमेव 'यत्रार्थः शब्दो

---

[1] ध्वन्यालोकभूमिका- पृ. 15

[2] प्रकाशव्याख्यायुत ध्वन्यालोके भूमिकाभागे पृ. 22- 24

[3] ध्वन्यालोकः तारावतीव्याख्यासहितः, भूमिका, ix

[4] द्रष्टव्यम् – व्यक्तिविवेकः, 96, पृ. चौ. 1964 संस्कृत काव्यशास्त्र का आलोचनात्मक इतिहास – 184 रेवाप्रसादद्विवेदी

वा' इतिकारिकाव्याख्यानेऽपि महिमभट्टेन अभिनवगुप्तपादानां भ्रान्तत्वं निरूपितम्। यथोक्तं तेन – '**अर्थः शब्दो वेति तु विकल्पाभिधानं प्राधान्याभिप्रायेण' इति यदाहुस्तद् भ्रान्तिमात्रमूलं न तत्त्वमित्यलमवस्तुनिर्बन्धेन**'[1]।

- **आधुनिकविमर्शकानाम् आशयः**

1. 'अभिनवगुप्त की लोचन टीका का अवेक्षण' इत्यभिधे निबन्धे प्रो.रहसविहारीद्विवेदिना कश्चन विमर्शो विहितः सन्दर्भेऽस्मिन्[2]।
2. ध्वन्यालोकस्य 'दीपशिखा' इति टीकाकर्त्तारः सन्ति आचार्यश्रीचण्डिकाप्रसादशुक्लाः। अत्र भूमिकायां 'लोचन की स्वैरिता' इति शीर्षकं स्वीकृत्य हिन्दीभाषायां 'लोचनकारस्य स्वैरिता' इति शीर्षकमधिकृत्य च संस्कृतभाषायाम् आचार्यश्रीचण्डिकाप्रसादशुक्लमहाभागैः ध्वन्यालोकलोचनस्य नैकस्थलानां समीक्षा विहिता[3]। लेखोऽयं 1984 तमे वर्षे उत्तरप्रदेशसंस्कृतसंस्थानस्य स्मारिकाख्यषाण्मासिकानुसन्धानपत्रिकायामपि प्रकाशितोऽसीत्। 'अहो बलीयसी व्यञ्जेव ध्वनित्वभ्रान्तिः' इत्ययं लेखः श्रीशुक्लानाम् उत्तरप्रदेशसंस्कृतसंस्थानस्य 'परिशीलनम्' इत्याख्यायां पत्रिकायां 1995 तमे वर्षे दशमेऽङ्के प्रकाशितो वर्तते। अत्रापि तैः विविधप्रमाणपुरस्सरम् अभिनवगुप्तव्याख्यां परीक्ष्य निराकृत्य च ध्वनिस्वरूपं प्रकाशितम्[4]। श्रीशुक्लैः अभिनवगुप्तस्य बह्व्यः अपव्याख्याः दर्शिताः। हिन्दीटीकायाः भूमिकायां तैः क्षमायाचना अपि कृता–

   दुर्धरं शास्त्रचिन्तायां ध्वन्यकूपारमन्दरम्।
   वन्देऽभिनवगुप्ताख्यं ज्ञानमार्त्तण्डमुद्गरम्[5]॥
3. आचार्यश्रीचण्डिकाप्रसादशुक्लमहाभागैः **'ध्वन्यालोकपाठे लोचनकृत्कृतः क्वाचित्कोऽर्थभेदस्तेन सञ्जातोऽनर्थश्च' इति** शीर्षकमङ्गीकृत्य कश्चन विचारः ध्वन्यालोकस्य भूमिकायां कृतोऽस्ति[6]।

- **लोचनस्य विवादितानि कानिचन स्थलानि –**

ध्वन्यालोकस्य रहस्यं प्रकाशयन्ती लोचनटीका प्रायः सहृदयेभ्यो बहु रोचते। परन्तु यदा वयम् आनन्दवर्धनेन प्रतिपादितानां केषाञ्चन सिद्धान्तानां व्याख्यायां लोचनकाराणां पद्धतिं पश्यामः तदा ज्ञायते

---

[1] व्यक्तिविवेक , प्रथमो विमर्शः, पृष्ठम् - 91

[2] द्रष्टव्यम्, भाषा पत्रिका सितम्बर अक्टूबर 2016 ( अभिनव गुप्त और भारतीय साहित्य विशेषाङ्क ) पृ. 140-146 अत्र http://www.cdulpublication.mhrd.gov.in/ebook/e-journal/Bhasha_Sep-Oct2016/html5forwebkit.html?page=0 द्रष्टुं शक्यते।

[3] द्रष्टव्यम् – ध्वन्यालोकः, भूमिका 28-41, परिशिष्टम् – 368-80

[4] द्रष्टव्यम् – ध्वन्यालोकः, परिशिष्टम्- 01

[5] ध्वन्यालोकः, भूमिका, पृ. 40

[6] द्रष्टव्यम् – ध्वन्यालोकलोचनम् – पृ. 16-22

यत् लोचनकारस्य व्यापिका दृष्टिः अनेकत्र अनपेक्षितार्थमपि प्रकाशयति, एतेषां केषाञ्चन स्थलानां क्रमेण परिज्ञानं वयम् इत्थं कर्तुं शक्नुमः–

- **प्रतीयमानार्थे एव ध्वनिशब्दस्य प्रयोगः –**

आनन्दवर्धनेन काव्यमार्गे 'काव्यस्य आत्मा ध्वनिरि'तिवचनेन कश्चन नूतनसम्प्रदायः प्रवर्तितः। यद्यपि आनन्दवर्धनात् पूर्वमपि लक्ष्यग्रन्थेषु ध्वनिकाव्यविशेषस्य सत्ता वर्तत एव, परञ्च आनन्दवर्धनात् पूर्वं केनापि साहित्यशास्त्रविचक्षणेन ध्वनिकाव्यस्य लक्षणं काव्ये तस्याङ्गीत्वञ्च नैवोपदर्शितम्। अतश्च ध्वनिकारेण आनन्दवर्धनेन स्वयमेव अस्य विषये प्रोक्तम् -

**"विमतिविषयो य आसीन् मनीषिणां सततमविदितसतत्त्वः।**

**ध्वनिसंज्ञितः प्रकारः काव्यस्य व्यञ्जितः सोऽयम्"**[1] ।।

यद्यपि आनन्दवर्धनेन ध्वनेः स्वरूपं ध्वन्यालोके बहुधा निरूपितम्, तथापि आनन्दवर्धाभिमतध्वनिः कः ? इति विषये साम्प्रतमपि महान् मतभेदो विद्यते टीकाकारेषु । मतभेदस्यास्य बीजन्तु लोचनकृतां व्याख्यानमेव वर्तते, यतो हि लोचनकृता सर्वत्रैव प्रतीयमानस्य कृते ध्वनिव्यवहारः कृतः, यस्तु मूलविरुद्ध एव। लोचनकारस्य इयं व्याख्यानसरणिः इत्थं ज्ञातु शक्यते –

आनन्दवर्धनेन '**काव्यस्यात्मा ध्वनिरिति**'[2] प्रतिज्ञावाक्येन ग्रन्थारम्भः कृतः। ततः द्वितीयकारिकातः द्वादशकारिकापर्यन्तं काव्यशास्त्रे अप्रत्यभिज्ञातस्य प्रतीयमानार्थस्य व्यङ्ग्यार्थस्य प्रत्यभिज्ञां कारयितुम्, महत्त्वं दर्शयितुम्, वाच्येन सह तस्य सम्बन्धं प्रदर्शयितुञ्च एका भूमिका रचिता। एतत्तु स्वयमेव वक्ति ग्रन्थकारः– **"तत्र ध्वनेरेव लक्षयितुम् आरब्धस्य भूमिकां रचयितुमिदमुच्यते"**[3] इति। इत्थं ध्वन्यालोके एकादशकारिकया व्यङ्ग्यपरिचयः प्रदत्तः। अत्र कारिकासु आनन्दवर्धनः प्रतीयमानस्यार्थस्य काव्यात्मता, वस्त्वलङ्काररसादिभेदाः, आलोकार्थिमतुष्यस्य दीपशिखोद्योग इव प्रतीयमानार्थिकवेर्वाच्यसौन्दर्योद्योगः, काव्यतत्त्वज्ञैरेव प्रतीयमानार्थस्य ज्ञेयता, महाकविप्रतिभया सह प्रतीयमानार्थस्य अविनाभावसम्बन्ध इत्यादिविषयान् प्रकटीचकार। परञ्च लोचनकारेण '**काव्यस्य आत्मा ध्वनिरिति बुधैः यः समाम्नातपूर्वः**' इति कथनस्य '**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः**' इति, '**प्रतीयमानं पुनरन्यदेव**' इति '**काव्यस्यात्मा स एव अर्थः**' इत्यादिकथनेन सह एकीभावं गृहीत्वा '**ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमिः**'[4] 'एवं **'प्रतीयमानं पुनरन्यदेव' इतीयता ध्वनिस्वरूपं व्याख्यातम्। अधुना काव्यात्मत्वमितिहासव्याजेन च दर्शयति – काव्यस्यात्मेति।** स एवेति

[1] ध्वन्यालोकः, तृतीयः उद्योतः, पृ. - 492
[2] ध्वन्यालोकः, प्रथम उद्योतः, कारिका - 02
[3] ध्वन्यालोकः, प्रथमः उद्योतः, वृत्तिभागः, पृ. - 43
[4] ध्वन्यालोकः, लोचनटीका, पृ. - 43

**प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्**'[1] इत्यादिविपरीतव्याख्यानेन 'यः काव्यात्मा ध्वनिः स एव काव्यात्मा प्रतीयमानार्थः व्यङ्ग्यार्थो वेति' सिद्धान्तः निरूपितः। वस्तुतस्तु लोचनकारेण प्रतीयमानार्थं काव्यात्मरूपेण संस्थाप्य स्वस्य व्याख्यानस्य स्वैरित्वमेव प्रकटीकृतम्, यतो हि स्वयमेव आनन्दवर्धनेन ध्वनिलक्षणकारिकायाः भूमिकायां पूर्वोक्तस्य व्याख्यानस्य विषये प्रोक्तं यदित्थमस्माभिः वाच्यवाचकव्यतिरिक्तस्य व्यङ्ग्यार्थस्य काव्ये सद्भावं विभिन्नैः प्रमाणैः संस्थापितम्, इदानीं 'काव्यस्यात्मा ध्वनिः' इति प्रतिज्ञातस्य ध्वनिपदार्थस्य विवेचनं करिष्यते। यथोक्तं तैः -

'**एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत** उपयोजयन्नाह- **यत्रार्थः शब्दो वा।**'[2]

एवमेव ध्वनिकारेण 'यत्रार्थः शब्दो वा' इतिकारिकायां 'काव्यविशेषः ध्वनिः' इति प्रयोगेण ध्वनेः काव्यविशिष्टत्वं प्रतिपादितम्। अतश्च ध्वनिकारानुगामिना मम्मटाचार्येणापि '**इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः**'[3] इतिव्याख्यानेन उत्तमकाव्यस्यैव कृते ध्वनिकाव्यस्य प्रयोगो विहितः, यत्र तु व्यङ्ग्यं वाच्याद्विशिष्टं भवति।

एवमेव भक्तिः ध्वनिः इति मतं खण्डयता आनन्दवर्धनेन ध्वनिस्वरूपं भक्तिस्वरूपं च प्रदर्शितम्। यत्र आचार्येण व्यङ्ग्यप्राधान्ये एव ध्वनिकाव्यं स्वीकृतम्, येन स्पष्टं प्रतीयते यत् आनन्दवर्धनमते ध्वनिः काव्यविशेष एव यत्र व्यङ्ग्यस्य प्राधान्यं सर्वथा आवश्यकमिति। यथोक्तं तत्र –

**"वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः। उपचारमात्रन्तु भक्तिः"[4]।**

एतेन सुस्पष्टं भवति यत् आनन्दवर्धनमते "ध्वनिस्तु काव्यविशेषमेवास्ति न व्यङ्ग्यं न च व्यञ्जना" इति।

- **वाग्विकल्पानामित्यत्र वाक्शब्दस्य अनपेक्षितार्थे व्याख्या -**

ध्वन्यालोकस्य प्रथमोद्योते ध्वनिविरोधिनाम् आक्षेपान् समादधतः आनन्दवर्धनाचार्याः काव्यविशेषरूपः ध्वनिरिति प्रतिष्ठापितवन्तः। तत्र आनन्दवर्धनेन प्रथमोद्योतस्य प्रथमकारिकायां त्रयः ध्वनिविरोधिनः वादाः समुल्लिखिताः। इमे वादाः साहित्यशास्त्रीयाचार्याणामेव इत्यपि शास्त्रविदः अभिप्रयन्ति। तत्र प्रथमोऽस्ति अभाववादः। वादोऽयं तेषाम् आचार्याणां वर्तते यैः स्वग्रन्थे क्वचनापि ध्वनेरुल्लेख एव न कृतः। अर्थात् एतन्मते ध्वनेः सत्तैव न भवति। सन्त्येते खलु अभाववादिनः। द्वितीयो वादो भवति भाक्तवादः। भाक्तवादिनः काव्यविशेषं ध्वनिं लक्षणारूपं लक्षणासम्बद्धं वा अङ्गीकुर्वन्ति।

[1] ध्वन्यालोकः, लोचनटीका, पृ. 86
[2] ध्वन्यालोकः, प्रथमः उद्योतः, पृ. 102
[3] काव्यप्रकाशः, बालबोधिनीसनाथितः, प्रथमः उल्लासः, पृ. - 19
[4] ध्वन्यालोकः, प्रथमः उद्योतः, पृ. - 149

अनिर्वचनीयतावादः विद्यते तृतीयः। एते ध्वनेस्तत्त्वम् अलक्षणीयम् अनिर्वचनीयं वेति प्रतिपादयन्ति। ध्वनिकारेण अभाववादिनां मतेऽपि 'केचिदाचक्षीरन्' 'अन्ये ब्रूयुः' 'पुनरपरे तस्याभावम् अन्यथा कथयेयुः' इत्यादिशब्दैः त्रयः पक्षाः सम्भाविताः। तत्र अभाववादस्य तृतीयपक्षप्रतिपादनावसरे तैरुक्तम्-

**किञ्च वाग्विकल्पानाम् आनन्त्यात् सम्भवत्यपि वा कस्मिंश्चित् काव्यलक्षणविधायिभिः प्रसिद्धैरप्रदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति यदेतदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते, तत्र हेतुं न विद्मः**[1]। **इति।**

अत्र अभिनवगुप्तपादाः 'वाग्विकल्पानाम्' इति पदमधिकृत्य वदन्ति – "वाग्विकल्पानामिति। वक्तीति वाक् शब्दः। उच्यत इति वागर्थः। उच्यतेऽनयेति वागभिधाव्यापारः"[2]।

अभिनवगुप्तमते अत्र वाक्शब्दः शब्दार्थव्यापारार्थपरामर्शकः। वस्तुतस्तु 'वाक्' इति पदं सम्पूर्णसंस्कृतवाङ्मये निरपवादरूपेण शब्दस्य कृते प्रयुक्तं भवति। अतः अभिनवगुप्तस्य व्याख्येयं नितान्तम् असमीचीनेति। सन्दर्भेऽस्मिन् 'दीपशिखा' इति नामधेयायाः टीकाकर्त्र्यः श्रीचण्डिकाप्रसादशुक्लाः स्वाभिप्रायमित्थमेव प्रकटीचक्रुः[3]।

- **ध्वनिकाव्यभेदनिरूपणे लोचनकारस्यासङ्गतिः** -

लोचनकारेण अभिनवगुप्तेन आनन्दवर्धनोक्तं प्रतीयमानमिति पदं सर्वत्रैव ध्वनिपदार्थे प्रयुक्तम्। तेन न केवलं ध्वनिस्वरूपे असङ्गतिः भवति, अपितु ध्वनिभेदनिरूपणेऽपि संशयः जायते, यतो हि आनन्दवर्धनः प्रतीयमानार्थस्य प्रकारत्रयं वक्ति - 1. वस्तु 2. अलङ्कारः 3. रसादिश्च। तथाहि –

**"स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलङ्काररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते"**[4]।

यतो हि लोचनकारेण प्रतीयमानपदं ध्वनिपरकं स्वीकृतम्। अतश्च लोचनकाराभिप्रायेण इमे अपि ध्वनिभेदाः सन्ति। अतश्च तेन स्वमते वस्त्वलङ्काररसादिध्वनिभेदानां सङ्गतिः अविवक्षित-विवक्षितान्यपरवाच्याभ्यां ध्वनिभेदाभ्यां सह प्रस्तुता। यथोक्तं तेन -

**"वस्त्वलङ्काररसात्मना हि त्रिभेदोऽपि ध्वनिरुभाभ्याम् आभ्यां सङ्गृहीत इति भावः"**[5]।

वस्तुतः आनन्दवर्धनेन सर्वप्रथम ध्वनिकाव्यविभागः ध्वनिस्वरूपकारिकायाः वृत्तौ एव प्रकाशितः। यत्र आनन्दवर्धनः अभाववादं निराकृत्य लक्षणाश्रितव्यञ्जनाव्यापारदृष्ट्या, अभिधाश्रितव्यञ्जनाव्यापारदृष्ट्या च ध्वनिकाव्यस्य भेदद्वयं उद्घोषयामास -

---

[1] ध्वन्यालोकः, प्रथमः उद्योतः, पृ. - 27

[2] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. 27-28

[3] 'वाक्' शब्द के साथ इस प्रकार का दुराग्रह केवल अभिनवगुप्त ही कर सकते थे। अन्यथा 'वाक्' का प्रयोग सम्पूर्ण संस्कृत वाङ्मय में केवल शब्द के लिये निरपवाद रूप से प्रयुक्त माना जाता है। (ध्वन्यालोकः, टिप्पणी, पृ. 06-07)

[4] ध्वन्यालोकः, प्रथमः उद्योतः, पृ. - 51

[5] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 144-145

“तदेवं ध्वनेस्तावदभाववादिनः प्रत्युक्ताः। अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन”[1]।

अस्यैव अनुसरणं परवर्तिभिः मम्मटादिभिः कृतम्। एतैरपि अविवक्षितवाच्यः विवक्षितान्यपरवाच्यश्चेति ध्वनिकाव्यस्य प्रधानभेदः स्वीकृतः। परञ्च ध्वन्यालोकस्य ध्वनिविभागात् पूर्वम् आचार्येण अभिनवगुप्तेन ध्वनिकारिकावृत्तिगतं वाच्यवाचकसम्मिश्रमितिपदमाश्रित्य ध्वनेः पञ्च भेदाः स्वीकृताः -

**“वाच्यवाचकसम्मिश्र इति। वाच्यवाचकसहितः, सम्मिश्र इति मध्यमपदलोपी समासः। ‘गामश्वं पुरुषं पशुम्’ इतिवत् समुच्चयोऽत्र चकारेण विनाऽपि। तेन वाच्योऽपि ध्वनिः। वाचकोऽपि शब्दो ध्वनिः। द्वयोरपि व्यञ्जकत्वं ध्वनतीति कृत्वा। सम्मिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यते इति कृत्वा” । शब्दनं शब्दः शब्दव्यापारः- न चासावभिधारूपः अपि त्वात्मभूतः सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वात्। अतएव साधारणहेतुमाह – व्यञ्जकत्वसाम्यादिति। व्यङ्ग्यव्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः साधारण इत्यर्थः”[2]।**

तथा च ध्वनिकारेण स्पष्टतः प्रदर्शितयोः अविवक्षितवाच्य-विवक्षितान्यपरवाच्यध्वनिभेदयोः व्याख्यानेऽपि अभिनवगुप्तः ध्वनिशब्दस्य व्युत्पत्तिं प्रदर्श्य ध्वनेः पञ्च अर्थान् मनुते। अतः एतद्भेदद्वयमपि न पञ्चस्वर्थेषु समन्वेति, येन ग्रन्थाशये सन्देहो जायते। तथा च लोचनम् –

**“पञ्चस्वपि ध्वनिशब्दार्थे येन यत्र यतो यस्य यस्मै इति बहुव्रीह्यर्थाश्रयेण यथोचितं सामानाधिकरण्यं योज्यम्”[3]।**

एवमेव आनन्दवर्धनेन ध्वनिकारिकायाः वृत्तौ प्रतिपादितयोः अविवक्षितवाच्यध्वनि-विवक्षितवाच्यध्वनिभेदयोः भक्त्याः भिन्नत्वप्रतिपादने ‘अयमुक्तप्रकारो ध्वनिः’ इति वाक्यविन्यासः प्रयुक्तः, परन्तु अत्रापि लोचनकारेण ‘उक्तप्रकारः’ इतिपदस्य विवेचनायां ध्वनिपदस्य शब्दार्थव्यापारादिभेदेन ध्वनेः पञ्चभेदाः वर्णिताः। तथाहि लोचने -

**“उक्तप्रकारः शब्देऽर्थे व्यापारे व्यङ्ग्ये समुदाये च”[4]।**

वस्तुतः आनन्दवर्धनस्य ध्वनिविभागः वृत्त्याश्रयमूलक एव वर्तते, न तु शब्दार्थव्यापारादिव्युत्पत्तिमूलकः। अतश्च आनन्दवर्धनेन ग्रन्थस्य सम्पूर्णेऽपि द्वितीये उद्योते ध्वनिप्रभेदनिरूपणे अविवक्षितवाच्यभेदेन विवक्षितान्यपरवाच्यभेदेन ध्वनिकाव्यविभागः विस्तरेण निरूपितः तथा च ध्वनेः प्रथमतः द्वौ भेदौ एव स्वीकृतौ -

---

[1] ध्वन्यालोकः, प्रथमः उद्योतः, पृ. - 143

[2] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 141-142

[3] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 143

[4] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 149

**"व्यञ्जकत्वं हि क्वचिद् वाचकत्वाश्रयेण व्यवतिष्ठते यथा विवक्षितान्यपरवाच्ये ध्वनौ क्वचित्तु गुणवृत्त्याश्रयेण यथा अविवक्षितवाच्ये ध्वनौ। तदुभयाश्रयत्वप्रतिपादनायैव च ध्वनेः प्रथमतरं भेदावुपन्यस्तौ"**[1]।

एवमत्र भाक्तवादखण्डनावसरेऽपि लोचनकारेण आनन्दवर्धनस्य 'उक्त्यन्तरेणाशक्यम्' इति कारिकागतं 'शब्द' पदमाश्रित्य शब्दार्थव्यापारादिप्रकारेण ध्वनेः पञ्चभेदाः प्रतिपादिताः। यथोक्तं तेन -

**"शब्द इति पञ्चस्वर्थेषु योज्यम्"**[2]।

अभिनवगुप्तस्य व्याख्येयं न रोचते चण्डिकाप्रसादशुक्लाय। तेषां कथनं वर्तते यत् – संस्कृतवाङ्मये 'शब्द' इति पदस्य 'वाक्' इति पदस्य चेदृशोऽर्थः न कुत्रापि कृतः[3]।

अत्र श्रीशुक्लस्य अभिप्रायो विद्यते यद् – काव्यश्लोकानां व्याख्यावसरे श्लेषाद्यलङ्कारदृष्ट्या ईदृशार्थकरणं कदाचित् क्षमायोग्यं स्यात् परन्तु शास्त्रकारिकाणाम् व्युत्पत्त्या अन्यार्थकरणम् अपराध एव वर्तते। यदि ईदृशी स्वच्छन्दता शास्त्रे स्यात् तदा 'रमते मन्दोदर्या सह' इति व्युत्पत्त्या रामशब्दः रावणार्थम् अभिधास्यते। एवमेव 'रावयति शत्रून्' इति व्युत्पत्त्या रावणशब्दः रामार्थं कथयिष्यति। 'रूढिर्योगापहारिणी' इति सिद्धसिद्धान्ताद् इदम् अवश्यं स्वीकरणीयं यद् शब्दानां प्रवृत्तिनिमित्तकः अर्थः व्युत्पत्तिनिमित्तकार्थाद् सर्वदैव बलवान् भवति। तस्माद् शास्त्रे स्वसुविधानुसारम् अर्थः नैवोचितः। संस्कृते शब्दपर्याय एव 'वाक्' इति शब्दप्रयोगो वर्तते।

एवञ्च कारिकागतं 'उक्ति' इति पदमवलम्ब्याभिनवगुप्तेन उक्तिपदस्य व्यञ्जनाव्यापाररूपमर्थं कृतम्। तथाहि

**'उक्त्यन्तरेण ध्वन्यतिरिक्तेन स्फुटेन शब्दार्थव्यापारविशेषेण'**[4] **इति।**

वस्तुतस्तु लोचनकारस्य मूलविरुद्धमिदं व्याख्यानं ध्वन्यालोकावबोधने बाधकमेव प्रतीयते।

- **निष्कर्षः –**

लोचनकारेण अभिनवगुप्ताचार्येण आनन्दवर्धनाचार्यस्य 'काव्यस्यात्मा ध्वनिः' इति ध्वनिकारप्रतिज्ञावचनं मनसि निधाय सर्वत्रैव प्रतीयमानस्यापि कृते ध्वनिशब्दस्य व्यवहारः कृतः, येन **'व्यङ्ग्यप्राधान्ये एव ध्वनिः'**[5] इतिध्वनिसिद्धान्तस्य विरोधः जायते, यतो हि ध्वनिकारेण आनन्दवर्धनेन

---

[1] ध्वन्यालोकः, तृतीयः उद्योतः, पृ. - 458

[2] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 155

[3]

[4] ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 155

[5] (क) वाच्यातिरिक्तस्यार्थस्य वाच्यवाचकयोः तात्पर्येण प्रकाशने यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः। ... ध्वन्यालोकः, लोचनटीका, प्रथमः उद्योतः, पृ. - 149।

(ख) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः। (काव्यप्रकाशः, बालबोधिनीसमन्वितः, प्रथमः उल्लासः, पृ. - 13)

प्राथम्येन 'काव्यस्यात्मा ध्वनिः' इतिप्रतिज्ञावाक्यं उद्घोषयन् 'तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्' इति द्वादशकारिकां यावत् व्यङ्ग्यस्य सद्भावमेव प्रतिपादितम्, न तु ध्वनेः स्वरूपं निरूपितम्। अतश्च लोचनकारेण कृतः प्रतीयमानस्य कृते ध्वनिशब्दस्य प्रयोगः न समुचितः। इयं व्याख्या समस्यामुत्पादयति। अत एव गुणीभूतव्यङ्ग्यादिष्वपि ध्वनिशब्दस्य अतिव्याप्तिर्भवति एवञ्च सर्वत्र ध्वन्यालोकस्याशयाविष्करणे लोचनव्याख्यायां दोषो जायते।


❖ **सन्दर्भग्रन्थाः –**

- आचार्य रेवाप्रसाद द्विवेदी, संस्कृत-काव्यशास्त्र का आलोचनात्मक इतिहास, प्रकाशक – कालिदास संस्थान, वाराणसी, 2007
- आनन्दवर्धनः, ध्वन्यालोकः, दीपशिखाटीकासहितः, हिन्दीटीकाकारः – आचार्यचण्डिकाप्रसादशुक्लः, विश्वविद्यालयप्रकाशनम्, वाराणसी
- आनन्दवर्धनः, ध्वन्यालोकः, लोचनसहितः बालप्रियादिव्यञ्जनाभ्यां सनाथितः पट्टाभिरामशास्त्रिणा भूमिकाविवेचनादिभिस्संयोज्य संशोधितः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, 1940
- आनन्दवर्धनः, ध्वन्यालोकः, लोचनसहितः सटिप्पणप्रकाशहिन्दीव्याख्योपेतश्च, हिन्दीटीकाकारः – आचार्यजगन्नाथपाठकः, चौखम्भाविद्याभवनम्, वाराणसी, 2014
- आनन्दवर्धनः, ध्वन्यालोकः, श्रीमदभिनवगुप्तविरचितः लोचनव्याख्यासहितः तारावतीसमाख्यया व्याख्यया परिगतः, हिन्दीटीकाकारः – डा. रामसागरत्रिपाठी, मोतीलालबनारसीदास, वाराणसी, 1963
- भाषा पत्रिका सितम्बर – ( अभिनव गुप्त और भारतीय साहित्य विशेषाङ्क ), अक्टूबर 2016
- मम्मटः, काव्यप्रकाशः (झलकीकरकृतबालबोधिनीसनाथितः), पुनर्मुद्रितसंस्करणम्, परिमलप्रकाशनम्, दिल्ली
- महिमभट्टः, व्यक्तिविवेकः श्रीराजानकरुय्यकेन विरचितया व्याख्यया साहित्याचार्यश्रीमधुसूदनशास्त्रिविरचितया मधुसूदनीविवृत्या च समेतः, प्रकाशकः - चौखम्भासंस्कृतसीरीज-ऑफिस, वाराणसी, 1936
- साहित्यशास्त्रसमुच्चयः (द्वितीयो भागः), आनन्दवर्द्धनकविकृतो अभिनवगुप्ताचार्यलोचनसमेधितः ध्वन्यालोकः, परिष्कर्त्ता म. म. प्रो. रेवाप्रसादद्विवेदी, प्रकाशकम् – कालिदाससंस्थानम्, वाराणसी, 2013

❖ **सन्दर्भितपत्रिका –**

- लोचनकाव्यस्य स्वैरिता इत्यभिधेयः लेखः, उत्तरप्रदेशसंस्कृतसंस्थानस्य स्मारिकाख्यषाण्मासिकी पत्रिका, द्वितीयोऽङ्कः, प्रकाशनवर्षम् – 1984।
- अहो बलीयसी व्यङ्ग्ये ध्वनित्वशक्तिः इत्यभिधेयः लेखः, उत्तरप्रदेशसंस्कृतसंस्थानस्य परिशीलनाख्यषाण्मासिकी पत्रिका, दशमोऽङ्कः, प्रकाशनवर्षम् – 1995।

# THE UTILITY OF SANSKRIT IN MODERN TIME

**Dr. Partha Sarathi Mukhopadhyay**
**Assistant Professor of Sanskrit**
**Dr. B.N.Dutta Smriti Mahavidyalaya**

Max Muller said- 'Whatever sphere of human mind you may select for special study, whether it be language, or religion, or mythology, or philosophy, whether it be laws of customs, primitive art or primitive science, everywhere, you have to go India, whether you like it or not, because some of the most valuable and most instructive materials in the history of man are treasured up in India, and India only'.[1] Sanskrit is the classical language of India. It plays a great role in present time. According to Max-Muller that who does not feeling pride with his ancient history, he has no feeling about nationality. Practically, the present is the new product of the past.[2] The great cultural heritage is composed in this language. The literature, religion, philosophy, art, science etc. were composed in Sanskrit at ancient times.

The derivation of the verbal adjective Sa9sk4ta is sam-√k4 +kta (karma7i) in passive. The s (sut) comes according to Pāninian rule Samparibhyā9 karotau bhū=a7e (pā 6/1/137). It means which language is refined and thus adorned by Pānini and other Sanskrit grammarians. Monier Monier-Williams described in A Sanskrit-English Dictionary that the word Sa9sk4ta may be translated as 'put together, constructed and well or completely formed, refined, adorned, highly elaborated'. It is derived from the root word Sa9sk4ta – 'to put together, compose, arrange, prepare'. According to Sir William Jones – "The Sanskrit language, whatever be its antiquity, is of a wonderful structure; more perfect than the Greek, more copious than the Latin and more exquisitely refined than either".[3] For this language, India has earned great respect from the world. To keep this Indians should learn Sanskrit from the school –age. If the Indian culture is entered in the mind of student from childhood, they can absorb this very well. Prof. Dr. Louis Reno said- 'There is not a living culture without a living tradition. If India is beloved and cherished among the elite of the West, it is on account of her traditional culture. And this culture is embedded above all in the treasures of Sanskrit. Sanskrit and India are inseparably connected, in spite of all the transitory harungues of the politicians.'[4]

The corpus of Sanskrit literature encompasses a rich tradition of poetry and drama as well as grammar, scientific, technical, philosophical and religious texts. Sanskrit is a member of Indo-Iranian sub-family of the Indo-European family of languages. It is closest ancient relatives are the Iranian languages Avestan and Old Persian. So when we construct the phoneme in the Indo-European, we mainly depend on Sanskrit. Swami Vivekananda said- 'In philology, our Sanskrit language is now universally acknowledged to be the foundation of all European languages, which, in fact, are nothing but jargonized Sanskrit' (Complete Works of Swami Vivekananda, Vol. 2, India's gift to the world ). He also said- 'The Sanskrit language has made room for the Persian and the Arabic' (Complete Works of Swami Vivekananda, Vol. 4, Modern India).

Sanskrit is a classical language because it has given life to all Indian languages. Many scholars proposed that Sanskrit may be our national language. The Islamic rulers like Akbar, Jahangir, Shahjahan etc. encouraged to practice of Sanskrit every time. Before the British rule, Indians exchange their thoughts through literature, religion, philosophy by this language. Rabindranath noted in the article Āśramera Rūpa O Vikāśa that the eternal mind of India in the guidance of Sanskrit. By this holy path we can touch the consciousness of nature, we absorb in mind also. We can get knowledge through English language and it is very necessary. But we feel joy from Sanskrit. It colours our mind. Here we find a deep speech which clam our mind and gives the respect to our mind.[5] Mahatma Gandhi compared Sanskrit with the river Gangā for all Indian languages. If it became dry, regional languages also lose their vitality and power. Pramatha Chaudhuri, another biographer of Sri Sri Ramakrishna told that not only for scholars, we should know classics for being a cultured man. Our classical language is Sanskrit. The Rāmāya7a, the Mahābhārata, the poetics of Kālidāsa, the dramas of Bhāsa, the Kādambarī of Bā7abha55a, Śatakas of Bhart4hari- they are unparallel in Indian literature.[6] 'The Ganga remains sacred from Gomukh, its source, to Ganga sagar where it enters the ocean. It sanctifies the tributaries, which attain the very nature of Ganga. Similar is Sansk4it: sacred by itself, it sanctifies all that come its contact'- said Smt. Sushma Swaraj, Minister of External Affairs, Govt. of India, in the Inaugural session of World Sanskrit Conference 2015[7]. Swami Vivekananda said-' Sanskrit is the divine language' (Complete Works of Swami Vivekananda, Vol. 3, Buddhistic India).

The ancient politics of India is also attracts the today's lawyers. One great lawyer of Poland said- 'None can be compared with the Indian laws in exactness and versatility. I believe that no book so competent as Kau5ilya's Arthaśāstra published in ancient times. No work on politics, administration and law describes local conditions so well. This work alone is enough to invite the study of ancient India and draw a man to this country for ever.'

In this modern age Sanskrit is being treated as one of the scientific languages of the world. Its script i.e. Devanāgarī is also easily accessible by the computer in its various programme. However, it is known that computers are now emerging as powerful instrument ushering a new era of global revolution in the field of modern education for all type of progress of the people in the society. The advantages offered by these new tools of education combined with the power of technology are being absorbed and adopted for the purpose of Sanskrit studies in India and abroad too. Sanskrit grammar, astronomy etc are growing more interesting subjects through the medium of English and other languages. In the Inaugural session of World Sanskrit Conference 2015, Smt. Sushma Swaraj, Minister of External Affairs, Govt. of India, said that in the present time scientists admit that Sanskrit can play an important role in developing software for language recognition, translations, cyber security and other fields of artificial intelligence. So our efforts are to be directed towards narrowing the gap between the study of śāstras and science.[8]

Today we see that lack of integration in all over the India. It was started after the independence. But only the Sanskrit can make integration between many languages. Śa9karācārya, Rāmānujācārya, Śrīcaitanyadeva etc were grown up their movement through Sanskrit language. Dr. K. M. Panikkar said- 'When we talk of our national genius being unity in diversity, the fundamental oneness of the Indian minds; what we are really meaning is the dominance of

Sanskrit which overrides the regional differences and linguistic peculiarities and achieves a true national and even gives form and shape to the languages.... The unity of India will collapse if it ceases to be related to Sanskrit and break away from Sanskrit and Sanskrit tradition.'[9]

In present days we see the deterioration of moral values. To recover this situation we need value education which can be possible through Sanskrit studies. In the Rāmāya7a, the Mahābhārata, the Purā7as, the Upapurā7as, the Pañcatantra, the Hitopadeśa etc give the Value Education to us. Today we see that stories of those books are presented through animation films. Smt. Swaraj said that knowledge in Sanskrit will go a long way in finding solutions to the contemporary problems like global warming, unsustainable consumption, civilisation clash, poverty, terrorism etc. So a new direction and vision is needed in the field of research in Sanskrit to accomplish this task.[11]

References :

1. Udbodhan, Vol. 116, November 2014, p.974.
2. Sanskrit Sahitya Patrika, Vol. LXIII, Nos. 1-12. April 1980-March 1981, p.104.
3. The Third Anniversary Discourse, on the Hindus, delivered to the Asiatic Society, 2nd February, 1786.Cited from Sir William Jones, Selected Poetical and Prose Works, ed. Michel J.Franklin, Cardiff : University of Wales Press, 1995, pp. 355-370.
4. Udbodhan, p.974.
5. Udbodhan, p.975.
6. Udbodhan, p.976.
7. The Hindu, internet version, June 28, 2015.
8. Udbodhan, p.974.
9. The Hindu.
10. Udbodhan, p.976.
11. The Hindu.

# अलङ्कारसम्प्रदायं प्रति काव्यप्रकाशव्याख्याया: मधुमत्या: योगदानम्

डॉ. जयकृष्णाकरः

आदिकन्दपुर, अस्तरङ्ग, पुरी

**अलङ्कारशास्त्रस्य सामान्यपरिचयः —**

अलङ्करोतीति अलङ्कारः अलंक्रियतेऽनेनेति वा अलङ्कारः । अलङ्काराणामपि काव्ये महत्त्वं दरीदृश्यते । यथा- गुणगौरवयुक्ताऽपि वनिता अलङ्कार आभूषणैः शोभते न तथा अलङ्काररहिता।

काव्यस्य शरीरं तु शब्दार्थौ। तयोः शब्दार्थयोः सौन्दर्यधायकं तत्त्वमलङ्कारः । अयम् अलङ्कारः शब्दार्थयोः सौन्दर्यं चमत्कृतिमपि वर्धयति । एषा चमत्कृति क्वचिदनुप्रासादि (शब्दालंकारैः) क्वचित् उपमादि (अर्थालङ्कारैः) च द्योत्यते । मानवशरीरे हारकटककुण्डलादीनाम् अलङ्काराणां वस्त्रादीनां वा यथा महत्त्वमनुभूयते तथा काव्यस्य शब्दार्थशरीरे शब्दार्थालङ्काराणां महत्त्वमपेक्षते ।

अलङ्कारस्य महत्त्वप्रसङ्गे अग्नीपुराणे कथ्यते- 'अलङ्काररहिते विधवैव सरस्वती' । अलङ्कारस्य लक्षणमाचार्यप्रवरो दण्डिना काव्यादर्शे इत्थं प्रतिपादितं यत्- ''काव्यशोभाकारान् धर्मान् अलङ्कारान् प्रचक्षते ।''[१] अर्थात् काव्यस्य शोभावर्द्धकाः धर्माः अलङ्काराः भवन्ति । काव्यप्रकाशकारः मम्मटाचार्यः स्वीय काव्यप्रकाशे अलङ्कारस्य लक्षणम् इत्थं प्रतिपादयति यत्-

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः ।।[२]

आचार्यविश्वनाथानुसारम् अलङ्कारस्य लक्षणं यत्-

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।[३]

अस्माज्ज्ञायते यत् अलङ्काराः अङ्गदादीवत् शब्दार्थयोः शोभावर्द्धकाः रसादीनां चोपकर्तारः भवन्ति। प्रसादादिगुणवत् अलङ्काराः न अनिर्वार्या इति गुणवादीनां मतम् । अत एव अलङ्काराः

---

१. काव्यादर्शः २/१

२. काव्यप्रकाशः ८/३७

३. साहित्यदर्पणः १०/१

अस्थिरा धर्माः इति काव्ये उच्यन्ते ।

अलङ्काराणां काव्ये स्थानमिति विषये आलङ्कारिकाणां मतपार्थक्यं दृश्यते । रीतिवादिनः अलङ्कारवादिनश्च काव्ये अलङ्काराणामनिर्वार्यत्वं स्वीकुर्वन्ति। अस्मिन् प्रसङ्गे आचार्यवामनः कथयन्ति –

काव्यशोभायाः कर्त्तारो धर्माः गुणाः । तददतिशयहेतवस्त्वलंकाराः ।।[४]

परन्तु ध्वनिवादिनः काव्ये अलङ्कारस्य महत्त्वं न स्वीकुर्वन्ति । चन्द्रालोककारः जयदेवस्तु ध्वनिवादिनां मतमिदम् समालोच्य कथयति यत्– अलङ्काररहितस्य काव्यस्य कल्पना तथैव हास्यास्पद यथा उष्णत्वगुणरहितस्य अग्नेः । उक्तञ्च–

अङ्गीकरोति यः काव्यं शब्दार्थवनलंकृती ।
असौ न मन्यते कस्माद् अनुष्णमनलंकृती ।।[५]

जयदेवस्तु अलङ्कारं काव्यस्य अनिर्वार्यधर्मत्वेन अङ्गीकरोति ।

**अलङ्कारस्य क्रमविकासः** —

अलङ्काराणां सर्वप्रथमोल्लेखः नाट्यशास्त्रे प्राप्यते । भरतमुनिना यमक-उपमा-रूपक-दीपकानीति चत्वारोऽलङ्काराः उल्लिखन्ते । ततःपरम् अग्निपुराणे (१५) अलङ्काराः, वामनविरचिते काव्यालङ्कारसूत्रे (३३) अलङ्काराः, दण्डिविरचिते काव्यादर्शे (३५) अलङ्काराः भामहविरचिते (काव्यालङ्कारे) (३९) अलङ्काराः, उद्भटविरचिते काव्यालङ्कारसारसंग्रहे (४१) अलङ्काराः, रुद्रटविरचिते काव्यलङ्कारे (५२) अलङ्काराः, मम्मटविरचिते काव्यप्रकाशे (७७) अलङ्काराः, विश्वनाथ विरचिते साहित्यदर्पणे (८४) अलङ्कारः, जयदेवविरचिते चन्द्रालोके १०० अलङ्काराः, अप्पयदीक्षितविरचिते कुवलयानन्दे (१२४) अलङ्काराः, पण्डितराजजगन्नाथविरचिते रसगङ्गाधरे (१८०) अलङ्काराः प्राप्यते । एवं प्रकारेण संस्कृतसाहित्ये अलङ्कारसंप्रदायस्य अलङ्काराणां च क्रमशो वृद्धिः लक्ष्यते ।

शब्दार्थदृष्ट्या अलङ्काराः त्रिधा विभज्यन्ते यथा– १. शब्दालङ्कारः, २. अर्थालङ्कारः, ३. उभयालङ्कारः । तेषु शब्दालङ्कारे अनुप्रासादयः अर्थालङ्कारे उपमादयः, उभयालङ्कारे श्लेषादयः गृह्यन्ते ।

अनेन एवमेव ज्ञायते यत्– काव्ये अलङ्काराणां तदेव महत्त्वं यज्जीवने आभूषणाम् ।

४. काव्यालङ्कारसूत्रः, ३-१/२ ५. चन्द्रलोकः १/८

अलङ्कारप्रसङ्गे एतादृशानि बहुमूल्यानि मतानि अवबोधनादनन्तरं काव्यप्रकाशव्याख्यायाः मधुमत्यां व्याख्याकारेण रविठक्कुरेण वर्णितानि कानिचित् तथ्यानि दृष्टिपथमवतरन्ति । तानि यथा- काव्यप्रकाशव्याख्यायां मधुमत्यां नवमोल्लासे शब्दालङ्कारनिर्धारणप्रसङ्गे रविठक्कुरः स्वकीयं मतम् इत्थं प्रतिपादयति यत्-

धन्याकेयं स्थिता ते शिरसि शशिकला किन्तु नामैतदस्याः
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दुः
देव्या निह्नोतुमिच्छति सुरसरितं शाठ्यमव्याद्विभोर्वः ।।

इत्यादौ वक्रोक्तिराधिका स्यात्, श्लेषकाकु अन्यतराभावात् । न चेयं न वक्रोक्तिः अर्थान्तरयोजनस्यापि सत्त्वात् वक्रोक्तित्व असम्भवात् इति चेत् न । अत्रापि शब्दश्लेषत्वात् । अर्थभेदेन शब्दभेदः इत्यभ्युपगमात् । तदिहापि सर्वनाम्नाम् अनेकार्थवाचिनां सुरसरित्परत्वाभिप्रायेण प्रयुक्तानां चन्द्रकलापरतया योजनं यथा- 'नारी पृच्छामि' इत्यत्र नारी विषयक प्रश्न परतया प्रयुक्तस्य तदुद्देश्यकप्रश्नपरतयायोजनमिति श्लेषवक्रोक्तित्वमेवास्येति ध्येयम् ।

पुनश्च 'वर्णसाम्यमनुप्रासः' इत्यस्मिन् प्रसङ्गे व्याख्याकारेणोक्त यत्- 'वर्णसाम्यमिति एकस्य द्वयोः बहूनां वा वर्णनां साम्यमित्यर्थः । तदनन्तरं विचित्रालङ्कारप्रसङ्गे टीकाकारेणोक्तं यत्- अभिन्नप्रयत्नोचार्यत्वस्य अर्थश्लेषता प्रयोजकत्वे 'अलङ्कारः शङ्का विद्यावके मति इत्यादौ अपि त्वदभ्यपगतशब्दश्लेषे अर्थश्लेषत्वं स्यात् इत्याह विधाविन्यादि तच्चित्रमिति । यत्र पद्ये घटकानां वर्णानां विन्यासविशेषेण स्वङ्गधाकारता तच्चित्रमित्यर्थः । तदनन्तरं पुनरुक्तवदाभासप्रसङ्गे रविठक्कुरेण स्वस्य अभिमतमित्थं प्रतिपादितं यत्- 'पुनरुक्तवदिति यस्य न सविधे दयिता' इति लाटानुप्रासे अतिव्याप्तिवारणाय इवेति । इव शब्द वाच्यसादृश्यस्य भेद घटिततया तत्र च तदभावात् । न च 'नवतरूतरूरक्तः' इत्यादो अव्याप्तिः । समानाकारशब्दनियतत्वस्य विवक्षितत्वात्। एवं च प्रतिमानानेकपुनरुक्तत्वेन शब्दत्वमिति स्थितं तत्र उभयोः सार्थकत्वे निरर्थकत्वे च अविशिष्टम् ।

शब्दालङ्कारेषु रविठक्कुरेण स्वस्य बहुमूल्यानि मतानि संयोज्य अर्थालङ्कारेष्वपि स्वकीयानि मतानि संयोजयन्ति तद्यथा- 'उत्प्रेक्षालङ्कारविषये स्वकीयमतमित्थं प्रतिपादयति यत्- सम्भावनमिति समेन उपमानेन । प्रकृतम् उपमेयम् । एवं च उपमानेन उपमेयस्य सम्भावनम् उत्प्रेक्षा इत्यर्थः ।

ननु – सम्भावनं न तावत् आहर्यस्तदारोप: रूपकेऽतिव्याप्ते: । नापि आहार्य: उत्कटकोटिक: संशय: उदाहरणयो: संशयविषयानवगाहनत् । तदनन्तरम् अपश्नुति: अलङ्कारविषये सयुक्तिकं टीकाकार: स्वकीयं मनम् इत्थं प्रस्तोति यत् प्रकृतमिति । रूपके तु न प्रकृतनिषेध: इति ततो भेद: । वस्तुतस्तु प्राकरणिकं निषिध्य अप्राकरणिकं यत् साध्यते सा अपह्नुति: इति ज्ञेयम् । अत एव–

केशेषु बालात्कारेण तेन च समरे जयश्रीर्गृहीताम् ।
यथा कन्दराभिविधुरा: तस्य दृढं कण्ठे स्थापिता ।।

इत्यत्र 'स्वयं वनं न प्रपलाप्य गता: तद्वैरिण: अपि तु तत:पराभवं सम्भाव्यतान् कन्दरा: न न्यन्यन्नि इति अपह्नुति: व्यज्यते इत्यादिना औपम्याभावेऽपि अपह्नुरुक्ता ।

तदनन्तरं समासोक्ति अलङ्कारविषये टीकाकार: कथयति यत्– 'परोक्तिरिति' । अप्रस्तुत–प्रतिपादनमित्यर्थ: । भेदकै: विशेषणै: श्लिष्टै: उभयान्वययोगै: भेदकैरिति बहुवचनमविवक्षितम्। तेन प्रस्तुतवर्णनेन अप्रस्तुतप्रतिपादनं समासोक्ति: । अप्रस्तुतवर्णनेन प्रस्तुतप्रतिपादनं तु अप्रस्तुतप्रशंसा इति द्रष्टव्यम् ।

**उपसंहार:—**

काव्यप्रकाशव्याख्याकर्त्ता श्रीशिवशम्भोश्चरणाश्रित: आचार्यप्रवर: रविठक्कुर: काव्यप्रकाश–रूपक सुवर्णालङ्काररूपकग्रन्थे स्वस्य मधुमती रूपकं ससौरभं रत्नपुष्पं संयोज्य 'सुवर्णे सौरभम्' इति आभाणकस्य सार्थकतां प्रतिपादयति । मधुमत्यां या अलङ्कारचर्चा दृश्यते ता: चर्चा: पाठकान् अवश्यमेव सैद्धान्तिकं प्रमाणं प्रदाय आह्लादं सन्तोषं च प्रददाति । नास्त्यत्र द्विधा ।

—*—

**सहायकग्रन्थसूची–**


१. काव्यादर्श:, चौखम्बाविद्याभवनम्, वाराणसी ।

२. काव्यप्रकाश:, चौखम्बाविद्याभवनम्, वाराणसी ।

३. साहित्यदर्पण:, (चन्द्रकलाव्याख्या), कृष्णदासअकादमी, वाराणसी

४. काव्यालङ्कारसूत्र:, चौखम्बाविद्याभवनम्, वाराणसी ।

५. चन्द्रालोक:, (चन्द्रकलाव्याख्या), कृष्णदासअकादमी, वाराणसी

# Ancient Indian polity and administration in the AGNI-PURĀṆA

Moumita Banerjee
Ph.D Scholar, Department of Sanskrit
Raiganj University, West Bengal
Email ID: moumitabanerjee874@gmail.com

**Abstract:**

India has a rich cultural and historical heritage. The story of the progress of the ancient people is the main subject of history. If we want to know the present day India, we have to rescue the roots of ancient India. In order to study the lives of Indians of the past thoroughly, we must rely on various sources given by our Indian history. The sources of ancient Indian history can be studied in terms of the titles of three broads e.g. (1) Literary sources (2) Archaeological sources and (3) Accounts of the foreign historians and travellers. Though the most renewed work on polities and statecraft is undoubtedly, the *Arthaśāstra* (of *Kouṭilya* 3rd cent B.C), in spite of that among the literary sources the *Purāṇas* play an important role to contain historical information about royal dynasties. The *Purāṇas* have been very helpful to historians to get a better understanding of India from the 3rd to 6th century A.D. Among the eighteen *Mahāpurāṇas* the *Matsya* and Agni are relatively more important than the others from the point of view of study of the data pertaining to ancient Indian polity and administration. Between these two *Purāṇas Agni Purāṇa* is most important in my point of view. My work deals with polity and kingship, administrative organisation, revenue system, troop/corps and inter-state relations in Ancient Indian on the basis of *Agni Purāṇa* I will explain all these facts my full research paper.

**Keywords:** *Agni Purāṇa*, Polity and kingship, Administrative organization, Minister, Civil administration, Judicial administration, Local administration, Army and inter-state relation.

**Abbreviations:**

Abhilasi. : Abhilaṣitārthachintāmaṇi

Agni. : Agni Purāṇa

Amar. : Amarakaśa

Arth. : Arthaśāstra

Chapt. : Chapter

Chapts. : Chapters

KNS. : Kāmandaka Nītisāra

(Bombay ed. has been consulted unless noted otherwise)

Manu. : Manu Smṛti

Matsya. : Matsya Purāṇa

NVA. : Nītivākyāmṛta

P., PP. : Page, Pages

Śanti. : Śāntiparva

Śukra. : Śukranītisāra

Suśruta. : Suśrutasaṃhitā

VDP. : Viṣṇudharmottara Purāṇa

Yāj : Yājñvalka Smṛti

Yaśas : Yaśastilaka Champū

(Nirṇaya Sagar Press, edition is used unless noted otherwise)

**Full research paper**

## Introduction

From time immemorial, the main primary concern of man has been the protection of his own person and possession. People can live happily only if these two are properly protected. All the social, economic and political institutions that have been formed so far are intended for the minister for these two basic primary needs. Greek political philosopher Aristotle was of the opinion that a happy and honourable life can be secured by political institution called the state. Mac Iver point of view about state is "an association which acting through law as promulgated by a government, endowed to this end with coercive power, maintains within a community territorially demarcated the universal, external conditions of social order."[1]

In the ancient Indian literature which is one of the most important evidence for historical sources, give some idea about state that it was very often explained in the idea of government and kingship. It was also meant to control the human activities in order to provide safely and security to the life and properties of the individuals.

In ancient Indian polity, we find the predominance of the monarchical form of government although republics were not rare. The king occupied an elevated position in the government system. In the Vedas, the Purāṇas and Upaniṣhads, we find and dignified position assigned kingship. Manu written in his law code:

"He (Lord) made him of eternal porticles of Indra, and the wind,
Yama, the Sun and Fire, Varuṇa, the Moon and the Load of wealth."[2]

H.H. Wilson may rightly know as the father of modern Purāṇc researches. From H.H. Wilson and V. Smith books proved that Purāṇas came to be regarded

as a valuable source of the dynastic history of ancient India. From another article named 'Polity in the Purāṇas'[3] published in 1935, based on political organisation from Agni, Mārkaṇḍeya and Viṣṇu Purāṇas. For the political ideas and administration of ancient India nearly all most writers and scholars have utilised the Purāṇas as a source.

Agni Purāṇa is encyclopaedic in character. It deals with much more than the traditional subject-matters of the Purāṇas. In short, Agni Purāṇa is an epitome of ancient Indian culture. So without study of Angi Purāṇa no political thought can be fruitful. Therefore I select Agni Purāṇa to present a full picture of the polity and administration in ancient India.

- **Polity and kingship:**

The Arthaśāstra is the earliest available text to state the saptāṅga theory of state, which seems to have been accepted by both the Arthaśāstra[4] and the smṛti[5] schools of Hindu political thought. According to the ancient Indian writers, the state is constituted of seven elements. Those are Swāmin (king), Amātyas (Ministers), Rāṣṭra (Territory), Durga (fort), Bada (Army), Kosa (treasury) and allies (Friends). Agni Purāṇa considers the king to be the chief of the elements of the state, his power resting on his treasury. In the Agni Purāṇa kingdom is considered to be the most important element of the state. The Agni Purāṇa[6] adds that the kingdom should be inhabited by foreigners from various countries and be ruled by a king who is neither fool nor addicted to passions. In the Agni Purāṇa we find that the Rāṣṭra or Janapada lays emphasis not only on cattle and pasture together with fertility of soil and things such as rain, irrigation facilities etc., necessary for agricultural and pastoral economy but also on the improvement of water and land communications, which are essential for trade and commerce. Mines, minerals, artisans, merchants and markets (panya)[7] are also included in the list of the good qualities of the rāṣṭra, which shows the commercial and industrial nature of the state. In Purāṇa we find that an isolated state having no relation with other states. Contrary to this, it expects the

kingdom to be inhabited by persons from different states within India. We know, about the unstable political condition of India from the Agni Purāṇa, when so many kingdoms rose and fought among themselves. This Purāṇa declares the rāṣṭra to be the best of all the seven limbs of the state and asks the king to protect it. To win the battle[8] and achieve stability of kingdom[9] performed various divine activities. We also knew that the tyrannical king over the kingdom was soon destroyed. Purāṇa wants these seven elements to be mutually helpful and interdependent[10]. Though Purāṇa asked to punish old rebels, even so did not advised king to be generous or ruthless. The real duty of the king was to protect his kingdom from neighbouring states and increase his treasury by giving personal power and leadership. So Agni Purāṇa[11] repeals the principle laid down by Kauṭilya and Kāmandaka that the king is the root of the state, and treasury the root of king. This is the key of the stability of the state.

- **Kingship:**

Agni Purāṇa follows the traditional pattern in placing the lord or Swāmī at the top of the seven limits of the state in all its five lists[12]. Verbally the term swāmī indicates a sense of possession over the territory, gained through conquests or otherwise. According Arthaśātra and Viṣṇudharmottara Purāṇa the forms of king or swāmī the root of the state and its seven components[13]. The Manu Smṛti,[14] the Matsya Purāṇa[15] and the Śāntiparva[16] speculate on the divine origin of kingship. The Agni Purāṇa[17] prescribes similar incantations for the consecration of a God or a king. According this Purāṇa the king assumes functions at nine deities. The king accessories are also associated with divine sources. We find so many evidence of the king being part of the Gods. The Agni Purāṇa cites verses from the Amarakośa to give different synonyms of the king. We find two tendencies in ancient period: one is to reserve kingship for the kṣatriyas alone and the other to recognise the ruling king as a kṣatriya. In the Agni Purāṇa the first is strong and the second is weak.

Since the king was the pivot of the state machinery in early India, nearly all the texts on polity discuss the qualifications of the king. Some[18] devote an independent chapter called (rājaguṇāḥ) to it. Purāṇa provides us with four different, consolidated lists of such qualifications and also makes stray references to them. Arthaśāstra and kāmandaka, Agni Purāṇa[19] presents two exhaustive lists of the positive royal qualities. Our Purāṇa enumerats nineteen qualities which increase the prosperity of the king. But the number forty five in the Saṅkhalikhita[20], forty-four in the Abhilaṣitārthachintāmaṇi[21], nineteen in the Yājñvalkya and twenty in the Kātyāyana smṛti. Sameśvaradeva states that the forty-four qualities required in a king are necessary for gaining kingdom and maintaining its stability[22]. Agni Purāṇa declares that humility, root of all political frameworks, leads to the control of senses and thus helps the king to protect his kingdom[23]. When Agni Purāṇa deals with the good qualities of the seven limbs of the state it states that the king should processes twenty-one attributes. Other texts[24] regard a kingdom ruled by a boy or a woman as a country not worth living but the Agni Purāṇa does not. Purāṇa emphasised the popularity of king. The Purāṇa guided qualities make it possible for king to stay away from enemy countries.

Agni Purāṇa[25] lies down that princes are to be taught dharmaśāstra, Arthaśāstra, science of erotics (kāmaśāstra), archery (dhanurveda) besides the use of chariots, elephants, arts and crafts and daily exercises. This Purāṇa[26] also enjoins the princes to be on guard and degraded persons, for it gives rise to rebellious tendencies in then.

In spite of that from Agni Purāṇa we get a lot of valuable information about coronation ceremony, daily routine of the king, duties and functions of the king and royal privileges.

- **<u>Administrative organization:</u>**

**Minister:** Next positions of the king are Mantrins. The Agni Purāṇa summarises the Amarakośa and offers for the ministers at one place the

following synonyms – mantraī, dhīsachiva, amātya, mahāmātya and pradhāna;[27] at another place it simply uses the term mahāmātya[28]. According Kāmandaka mantrins are eyes[29] of king. This parallelism indicate their administrative and supervisory duties. It is seen in Agni Purāṇa[30] using the term sachiva instead of the mantrī and it also discussed about the qualifications of the sachiva and amātya separately. The Agni Purāṇa lays down that the ministers (mantrin) should process all kinds of knowledge (akhilātmajñān)[31]. We found in Agni Purāṇa[32] two important lady officers. But there is nothing to suggest the appointment of women to the post of minister. This Purāṇa shows the example of 7 and 8 ministers of Rāvana[33] and Daśaratha[34]. It also gives us some idea regarding the time and place for consulting the ministers. The Agni Purāṇa nowhere discussed the functions of the ministers. This Purāṇa instructs the ministers to attend vigorously to financial matters[35] and to appoint some minor officers, for higher functionaries are to be appointed by the king. In Agni Purāṇa, the advice of the minister was given the highest importance. In Agni Purāṇa the minister is identified as the source of the king's power. In short, we see a lot of important information about the minister in the Agni Purāṇa with examples.

**Civil administration:** It is the second important pillar of administrative organization. Through a single wheel cannot move, the administration cannot be run by the king alone without the help of other offers[36]. So Agni Purāṇa advised the king to appoint ministers, the royal priest, the astrologer, the chief queen[37] etc. and probably other high functionaries called amātya. However the word amātya has been used in different ways by different people. It also discussed about the positive and negative aspects of the amātya. Not only that with the help of various information with examples given by different people regarding amātya. Our text points out eight important functions of the amātyas. Different types of good and bad amātyas are presented in Agni Purāṇa as examples. However, this Purāṇa does not possible the number of amātyas to be appointed

by the king. It is only highlight the defects of the amātyas. Such as laziness, dumbfoundedness, pride, boastfulness and duplicity. The king to control his officers take four-fold policy. These are – love, gift, punishment and dissension. According Purāṇa[38] gift is the best policy. The powers and functions of the amātya, laid down in our Purāṇa. With contradictory opinion Agni Purāṇa discussed about amātya.

**Judicial administration:** according Purāṇa an important duty at the king is adjudication of civil and criminal cases[39]. As an important branch of administration, the Agni Purāṇa devotes one of its chapters on Rājadharma to the enumeration of seventy one crimes and the punishment thereof[40]. According to the Agni Purāṇa enables us to know what is just and what is unjust[41]. Agni Purāṇa discussed about the various sources of state law, repeats a verse of the Yājñvalkya Smṛti. This Purāṇa catalogues the old eighteen branches[42] of litigation termed as 'the eighteen legs of lawsuits'. Our text states that the judicial bench is to be assisted by respectable persons, an accountant and a scribe. It also admits twofold evidence, human and divine. We see the examples of proper justice system in various places of Agni Purāṇa. For instance this Purāṇa adds that only the original trespasser is to be prosecuted and not his son or grandson as in this case enjoyment is more valid; if the trespasser is dead, property illegally seized by him should be recovered from his possession because enjoyment of property without any legal right does not entitle him to it [43]. It also narrated the qualifications and disqualifications of a witness. So that people of all castes get due justice. Agni Purāṇa has provisions for appropriate punishment for nineteen types of crimes and crimes carrying a punishment of middle amercement also. According to the crime, fines had to be paid. we get a perfect picture of the justice system from Agni Purāṇa.

**Local administration:** According the Agni Purāṇa a kingdom divided into many smaller administrative units, such as rāṣṭra[44], janapada[45], deśa[46], viṣay[47], and maṇḍala[48]. They seem to have been divided into smaller units. Each unit is

described in this Purāṇa. Village is the smallest unit of the administration and Purāṇa also described it. Local administration was outlined in the Agni Purāṇa.

**Revenue system:** The Agni Purāṇa[49] repeats the traditional principle, which declares treasury to be the root of the king and adds that sovereignty is subordinate to it. The Agni Purāṇa emphasise the necessity of increasing the material resources of the state. This Purāṇa states that the king can increase his treasury only when his kingdom is well protected [50]. Aspects of the use of treasury's effectiveness have been highlighted. The Agni Purāṇa gives a summary and diffused treatment of the sources of revenue and expenditure. We get here a discussion of how revenue will be collected and from which sectors. Bhoga is another important source of revenue. The Agni Purāṇa knows two kinds of tolls (śulka): land customs and the ferry charges. This Purāṇa has fixed taxes for the king in certain places. The law of inheritance and ownership also provided a source of revenue; according to Agni Purāṇa. An important revenue term used by Agni Purāṇa is upahara[51]. In a word Agni Purāṇa has described the revenue collected system in a subtle way. In many places revenue collection system in Agni Purāṇa were prevalent.

**Army and inter-state relations:** Agni Purāṇa advises the king to wage against twenty types of persons[52]. It refers to the traditional fourfold division of the army[53]. According the Agni Purāṇa the army consisting mainly of foot solders is always victorious[54]. The Agni Purāṇa has determined the effectiveness and usefulness of all types of army.

The Agni Purāṇa favours the idea of an expending state (jigīṣu) which follows the policy of self-aggrandisement[55]. The principle to subdue enemies with the help of friends is developed by our Purāṇa into the traditional theory of the circle of twelve states[56]. According to our Purāṇa these are two circles of states, circle of states under the influence of the expanding state and the circle of inimical states. This Purāṇa has given a proper explanation. The description of the circle of twelve states indicates a state of constant antagonism between

various kingdoms. Finally it can be said the Agni Purāṇa's inter-state relations based on four traditional principles: theory of the circle of twelve stats, the six fold policy, the seven expedients and the three types of energies required in the king. It is apparently influenced by the Arthaśāstra-smṛti tradition but has a learing towards the views of Kauṭilya, which makes it approach to inter-state relationship more sensible.

- **Conclusion:**

The Agni Purāṇa owes to various texts, compiled between the eighth and tenth century. The traditional saptāṅga theory of the state continues to be popular with the Agni Purāṇa, through some contemporary texts add a few new elements to it. Through the seven limbs are interlinked but the king should pay highest attention for protection and development of the kingdom (rāṣṭra). Kingship is the only form of government. Being (king) his misconduct power and prestige are declining. Agni Purāṇa advocates a large number of rich gifts to the Brāhmaṇas, makes them immune from taxes and lays down that half of the revenue should be made over to them. On the other hand the Agni Purāṇa concedes same political and military rights to the śūdras, vaiśyas and the members of the mixed castes. Here we knew about the varieties duties and functions of the king. The ministers appear to be more powerful but are nowhere instructed to work in a team but it was not same like Maurya and Gupta. The king is the head of the judicial administration but the king is not completely independent in sentencing. The king is not free to administer justice. War is the main preoccupation of the government in Agni Purāṇa. In the field of inter-state relationship our Purāṇa takes the view of Kāmandaka as its model. Though income and expenditure are discussed but the treatment is not adequate. Lower levels administrator is not discussed fully.

The political organisation outlined in our Purāṇa seems to be the result of an attempt of synthesise the Arthaśāstra and the smṛti traditions, both of which

seem to enjoy authority in early medieval times. But the results are not irresistible.

**End Note:**

1. Mac Iver, R.M., The Mordern state London, 1926, p.22
2. Astānām Lokapālānām matrabhirnirmito nr, pah/Manusmṛiti.
3. Indian Review, 1935, pp. 365-368
4. Arth., 6.1; KNS, 4.1and 8.5
5. Manu, 9.294; Yāj., 1.353
6. 239.24.27
7. The Agni Purāṇa reads 'paṇya' instead of 'paṇya' in KNS, 4.57 which is the carrect form
8. Agni, chapts. 123-136
9. Ibid, 237.18-19
   susthiratvaṁ cha rājyasya saṁgrāma vijayādikaṃ,
   srīsiotraṃ satataṃ tasmātpaṭhechch śṛṇuyānnurah.
10. Ibid, 239.1; KNS, 4.1-2
11. Ibid, 237.19
12. Śukra, p.27
13. Agni, 225.12; VDP, II.65.21-25; Arth, 6.1 and 8.1; NVA, 17.3; Swāmīmūlāh sarvāḥ prakṛtayo; Matsya, 218.34.
14. 7.3 rājānamasṛjat prabhuḥ
15. Matsya, 225.1
16. Chapts.67-83; Arth., 1.13
17. Agni, 219.1.
18. VDP, II.3; Rājadharmakāṇḍa, chapt. 3 Rājaṃjiprakāśa, pp.115-121.
19. Agni, 238.4-5; 239.2-5; ct. Arth., 6.t; KNS, 1.20 -22 and 4.6-8.
20. Rājadharmakāṇḍa, chapt. 3, Nītimayūkha, pp. 47-48, Rājanītiprakāśa, pp. 116-121 for Sankhalikhita and other Smṛti tents, consult the Rājadharmakāṇḍa.
21. I, 2.2-7
22. Ibid., I. 2.1.
23. Agni, 238.2; 225.22
24. Someśvaradeva, a little later than our text, requires the king to be of mature age. (Abhilaṣi, I. 2.2)
25. Ibid., 225-22 and 238.9

26. Agni, 225.3, na chāsya saṅgo dātavyaḥ kruddhalubdavimānitaiḥ.
27. Agni, 366.2 cf. Amar., II. 8.4-5
28. Ibid., 106.11
29. KNS, 17.26.
30. 239.10-15; 239.15-16
31. Agni, 218.4.
32. 2203; 220.9.
33. Agni, 9.7
34. Agni, 6.3
35. 239.15: tatparatārtheṣu; cf. Viṣṇu Purāṇa, VI. 6.47: arthasādhanamantriṇaḥ; Abhilaṣi., I. 2.56; āyavyaya cha nipuṇaḥ sachivaḥ kośavṛddhye.
36. Arth., 1.7; Manu, 7.55; Śukra, 2.1; NVA; 18.2.3: naikasya kāryasiddhirasti, nahyckachakraṁ paribhramati; Yaśas., III.3. verse 26: niyogibhirvinā nāsty ṛājyaṁ bhūpe hi kevalc.
37. Agni, 218.4
38. Ibid., 226.12: na so'sti nā (rā) ma dānen vaśago yo na jāyate.
39. Ibid., 227.1: daṇḍapraṇayanam vakṣye yena rājñah parā gatiḥ
40. Agni, chapt. 227
41. Ibid., 253.1 vyavahāraṁ pravakṣyām nayānayāvivekadam.
42. The variant noted in the footnote, rather than found in the general body of the text, is correct.
43. Ibid., 253.57-59
44. Agni, 227.53, 239.2.
45. Ibid., 239.27
46. Ibid., 260.27, 260.47
47. Ibid., 13.14, 223.1, 212.23
48. Ibid., 212.23
49. 241.22: Koṣamūlo hi bhūpatiḥ 242.33; Arth., 2.2; Śānti.; 119.16; KNS., 13.33 and 19.16; VDP, 11.61.17.
50. Ibid., 223.4; VDP., II 61.7
51. Ibid., 362.36
52. Agni, 240.10-13
53. Agni., 228.6; 234.15
54. Agni, 228.7, Matsya., 239.21
55. Agni, 233.26
56. Ibid, 233.13

# BIBLIOGRAPHY

- **PRIMARY SOURCE**


*AGNI-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 2nd Ed.1419 (B.S.).

*AGNI-PURĀṆA* : Tarinish Jha & Ghanashyam Tripathy, Hindi Sahitya Sammelan, Prayag, 1st Ed. 1985. 3rd Ed. 2007.

*AMARAKAŚA* : Nāmaliṅgānuśāsana) with the commentary of Kṣīrasvāmī Ed. H.D. Sharma and N.G. Sardesai, Poona, 1941

*BHAGAVATA-PURĀṆA* : Gita Press, Gorakhpur, U.P., 7th Rpt. 2011.

*BRAHMA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1409 (B.S.).

*BRAHMĀNDA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1396 (B.S.).

*BRAHMAVAIVARTA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, N.D.

*BRAHMAVAIVARTA-PURĀṆA* : Gourinath Shastri, Nabapatra Prokashan, Part – I & II, Kolkata, 2017.

*BRAHMAVAIVARTA-PURĀṆA* : Acharya Ramesh Chaturvedi, Shri Lal Bahadur Shastriya Sanskrit Vidyapeet, Vol.-1, New Delhi.

*GARURA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1st Ed. 1392 (B.S.), Rpt. 1416 (B.S.).

*KĀMANDKĪYA NĪTISĀRA* : Venkateswar press, Bombay, V.E. 2009

*KĀMANDKĪYA NĪTISĀRA* : Ed. T. Ganapati Sāstrī, TSS, Trivandrum, 1912

*KAUTILYA'S ARTHAŚĀSTRA* : Eng. Tr. R. Shamasatry fifth Edition, Mysore, 1956. With Hindi Tr. Ganga Prasad Sastri, 2nd Ed., Gupta Press, Śamatī, Dt. Muzaffarnagar, V.E, 2010

*KŪRMA-PURĀṆA* : PanchananTarkaratna, Naba Bharat Publishers, Kolkata, 1395 (B.S.).

*MANU-SMṚTI* : With the commentary of Kullūkabhaṭṭa, Gujrati Printing press, Bombay, 1913

*MARKENḌEYA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1st Ed. 1390. (B.S.) Rpt. 1405 (B.S.).

*MATSYA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1st Ed. 1395 (B.S.). Rpt.1406 (B.S.).

*MUDRĀRĀKṢASA* : Ed. K.T. Telang, 8th Ed., Bombay Sanskrit Series, Bombay, 1935

*NARADA-SMṚTI* : Ed. J. Jolly, Calcatta, 1885, Eng. Tr. J. Jolly oxford, 1885

*NIRUKTAM* : Udhyachandra Bondopadhyaya, Sanskrit Book Depo, Kolkata, 1421 (Bengali Year).

*NĪTIVĀKYĀMṚTA* : Grantharatnamālā, Bombay, 1890 Manik Chandra Digambara Jain Granthamālā, Ed. Pannalal Soni, Bombay, V.E. 1979

*PADMA- PURĀṆA* : PT, Vol. – Sṛṣṭikhaṇḍa, Bhūmkhaṇḍa of Uttarakhaṇḍa, Naba Bharat Publishers, Kolkata, 1412 (B.S.), 1397 (B.S) & 1420 (B.S), respectively

*RĀMĀYAṆA* : Ed. Panchanan Tarkaratna, Benimadhabshils Library, Kolkata, 2014

*SUŚRUTASAṂHITĀ* : With the commentary of Ḍabhaṇa, NSP, Bombay, 1938

*VĀMANA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1420 (B.S.).

*VARĀHA-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1st Ed. 1401 (B.S.), 2nd Ed. 1419 (B.S.).

*VĀYU-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1st Ed. 1397 (B.S.), 2nd Ed. 1418 (B.S.).

*VIṢṆU-PURĀṆA* : Panchanan Tarkaratna, Naba Bharat Publishers, Kolkata, 1st Ed. 1390 (B.S.), 1417 (B.S.).

*VIṢṆU-PURĀṆA* : Gourinath Shastri, Nabapatra Prokashan, Kolkata, 2013

*VIṢṆU DHARMOTTARA PURĀṆA* : Venkateswar Press, Bombay, 1912.

*YĀJÑAVALKYA-SMṚTI* : TSS, 1922 with Vīramitrodaya and Mitākṣarā commentaries, Banaras, 1930

*YAŚASTILAKACHAMPŪ* : Ed. With the commentary of Śrutasāgara Suri, Vol. I, NSP, Bombay, 1916

- **SECONDARY – SOURCE**

Basu, Girindra Sekhar. : *PURĀṆAPRAVEŚ*. VIVEKANANDA BOOK CENTER. KOLKATA. Prathama Prakasa.1341 (B.S.).

Bhattacharjya, Biman Chandra : *SAṂSKRTA SĀHITYERA RUPREKHĀ*, Bidyodaya Private Ltd., Kolkata, 4th Edition, 2002.

Bondyapadhyaya, Dhirendranath : *SAṂSKRTA SĀHITYERA ITIHĀSA*,West Bengal state Book Board, Kolkata, 2nd Edition, 2009.

Chakraborty, Sattyajoti. : *SARBADARŚAN-SAṂGRAHA*, Sahittyashree. 4th Ed. 2014.

Hazra, R.C, : '*Studies in the Purāṇic records on Hindu rites and customs*', Matilal Banarsidass, Delhi, 2017.

# श्रीसोमनाथज्योतिर्लिङ्गदर्शनविमर्शः

श्रीमृण्मयमल्लिकः
सहाध्यापकः
श्रीचैतन्यकालेज, हावड़ा, उत्तर २४ परगणा
email : mrinmaybajitpur@gmail.com

**सारांश :** पूण्यभूमेः तथा देवभूमेः भारतवर्षस्य सर्वत्र देवमहिमा विराजते। भक्तजनस्य प्रार्थनया दुष्टदमनार्थं शिष्टपालनार्थञ्च युगे युगे देवाः मर्त्यभूमौ अवताररूपेण आविर्भूतोऽभवन्। हिन्दूनाम् अनेकानां देवानां देवादिदेवः महेश्वरः श्रेष्ठः भवति। सः अतीव जनप्रियः देवः। भक्तवत्सलः सः देवः त्यागि-गृहि-योगि-पण्डितजनानाम् आदर्शः भवति। शिवः भारतवर्षस्य बहुत्र विग्रहरूपेण लिङ्गरूपेण च दृश्यते। एतेषां शिवलिङ्गानां किमपि शिवलिङ्गं स्थापितं, किमपि स्वयम्भूलिङ्गं, किमपि च वाणलिङ्गरूपं विराजितम्। भारतभ्रमणकाले शङ्कराचार्येण स्वयम्भूलिङ्गाणां यानि लिङ्गानि निर्वाचितानि तानि ज्योतिर्लिङ्गानि इति आख्यायन्ते। यद्यपि शिवलिङ्गानि अनेकानि भवन्ति, तथापि निम्नलिखितानि शास्त्रोक्तानि द्वादशज्योतिर्लिङ्गानि प्रामुख्यं भजन्ते—

**"सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम्।**
**उज्जयिन्यां महाकालमोङ्कारममलेश्वरम्॥[१]**
**परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम्।**
**सेतुबन्धे तु रामेशं नागेशं दारुकावने॥[२]**
**वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे।**
**हिमालये तु केदारं घुश्मेशं च शिवालये"॥[३]**

उपर्युक्तानां द्वादशानां ज्योतिर्लिङ्गानां आदौ श्रीसोमनाथलिङ्गस्य नाम अस्ति। भगवतः श्रीशङ्करस्य प्रतीकरूपमिदं ज्यातिर्लिङ्गं भक्तजनानाम् अतीव श्रद्धास्पदम्। अस्य ज्योतिर्लिङ्गस्य दर्शनं पूजार्चनञ्च अतिकल्याणकरम्। अत एव भगवतः महेश्वरस्य कृपार्थी अहं क्षुद्रप्रचेष्टया प्रवन्धमिदं प्रस्तोस्यामीति।

**मूलशव्दा :** *ज्योतिलिङ्गम्, सोमनाथः, मन्दिरनिर्माणम्।*



सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चन्द्रकलावतंसम्।
भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये॥

भगवतः श्रीकृष्णस्य देहत्यागः तथा यादवानाम् अन्तःकलहवशादनु-ष्ठितायाः विनाशलीलायाः स्थलम् इति प्रभासपट्टनं परमपवित्रतीर्थरूपेण महाभारतकालादेव विश्रुतं विद्यते। पट्टनं नाम सागरतीरे अवस्थितं नगरम्। पट्टनस्य अपभ्रंशः पाटनम् इति। खीष्टपूर्वतृतीयशताब्द्यां अशोकसम्राजः शिलालेखः खीष्टाब्दस्य द्वितीये शतके रुद्रदामन्नाम्नः राज्ञः अभिलेखाः च प्राचीनकालादेव क्षेत्रस्यास्य महत्त्वं निर्दिशन्ति इति इतिहासविदः। ख्रिष्टाब्दस्य प्रथमे शतके शकनृपतिनरवाहनस्य अभिलेखे प्रभासक्षेत्रे सपर्यायाः अवसरे ब्राह्मणेभ्यः दानादिकर्मणः समुल्लेखः प्राप्यते। समग्रभारतविस्तीर्णानां द्वादशज्योतिर्लिङ्गानां मध्ये एकतमं ज्योतिर्लिङ्गं श्रीसोमनाथः। शैवमतान्तर्गतपाशुपतसम्प्रदायस्य प्रमुखं केन्द्रम् अत्रैव तस्थौ। पवित्रेऽस्मिन् तीर्थे मन्दिरस्य निर्माणं कदाभूत् इत्यस्य निर्णयम् इतिहासज्ञाः अपि कर्तुं न शक्नुवन्ति। परन्तु १०२५ खीष्टाब्दे महमुदगजनिना अस्य मन्दिरस्य विध्वंसः साधितः। मन्दिरस्य विशालता, भव्यता, धार्मिक-माहात्म्यं गजनवीमहोदयस्य समकालं विदुषा अल्बेरुनी-महोदयेन लिखितं, तस्मात् ज्ञायते। सः लिखति—श्रीसोमनाथमन्दिरस्य मध्येन प्रवहन्ती—वैदिकसरस्वती समुद्रं प्राविशत्। तथा यत्र भगवतः श्रीकृष्णस्य देहावसानं बभूव। पौराणिककथनानुसारं सोमतीर्थे दक्षप्रजापतिना केनापि कारणेन चन्द्रः शप्तः। ततः करुण पार्थनायाः फलस्वंरूपं दक्षेण उपायः निर्दिष्टः। महादेवस्य लैङ्गिकीं प्रतिमां यदि अर्चयेत् तर्हि शापमुक्तिः भवेदिति।

तदा चन्द्रेण पाषाणस्य लिङ्गं यत्र स्थापितं तत्स्थानं सोमनाथनाम्ना प्रसिद्धिम् गतम्। चन्द्रस्य अपरं नाम सोमः इत्यपि अस्ति। अल्बेरुनीमहोदयस्य मतेन सोमनाथस्य प्रतिष्ठा सर्वाधिका आसीत्। तस्य पूजायां नित्यं गङ्गायाः जलं तथा काश्मीरप्रदेशात् आनीतानि पुष्पाणि प्रयुज्यन्ते स्म। जनानाम् अयं विश्वासः आसीत् यत् सोमनाथस्य उपासनया असाध्याः रोगाः अपि उपशमं यान्ति। अत एव च चन्द्रेण साकं सम्बद्धे वृद्धिवेलासमये समुद्रजलं महादेवस्य ज्योतिर्मयलिङ्गं स्नापयित्वा

प्रतिनिनिर्वते। इयं प्रक्रियापि लोकान् आश्चर्यचकितान् विदधाति। शिवलिङ्गस्य चतुष्प्रान्तेषु तस्य संरक्षणाय विशालमन्दिरस्य विसृष्टिः कृता। तस्य परिसरः रत्नजडितस्वर्णरजतादीनां मूर्तिभिः अलङ्कृतः आसीत्। 'गिर टी जी' नाम्ना मुस्लिमलेखकेन स्वस्य 'किताब जैन उल अखबार' नाम्नि पुस्तके लिखितं यद् यथा मुसलमानानां कृते मक्कायाः महत्त्वं विद्यते तद्वदेव हिन्दूनां कृते सोमनाथस्य महन्महत्त्वं वर्तते।

अल्बेरुनीमहोदयः महम्मद-गजनवीद्वारा सोमनाथमन्दिरस्य विध्वंसं वर्णयन् लिखति-महम्मदेन हिजरी ७२२ अर्थात् शकगणनानुसारं ८४७ तमे वर्षे सोमनाथमन्दिरस्य उपरि आक्रमणं कृतम्। तेन शिवलिङ्गस्य उपरितनभागं सम्पूर्णतया चूर्णीकर्तुम् आदिष्टम्। तथा हीरकरत्नमणिमुक्तादिजडितानि एवं कौशेयादिमहार्घवस्त्रप्रावरादिवस्तुजातानि गजनीनगरं प्रति प्रेषितानि। इतरमुस्लिमलेखकैः अपि आक्रमणस्य विध्वंसस्य च रोमाञ्चकानि वर्णनानि उपन्यस्तानि। अत्र प्रश्नोऽयं मनसि स्वाभाविकतया एव समुद्भवति यद् मुष्टिमेयाः वैदेशिसैनिकाः कथम् एतादृशम् आक्रमणं सफलतया निर्वाहयितुं समर्थाः बभूवुः। समग्रपरिस्थित्याः सम्यगध्ययनं कृत्वा एतत् अध्यवसीयते यत् प्रथमं तावन्मन्दिरसमानं पवित्रं सर्वेषां कृते पूज्यं स्थानं कोऽपि लुण्ठितुं प्रवृत्तो भवेत् इत्यस्य कल्पना स्वप्नेऽपि केनापि नैव कृता। अतः देवस्थानानां रक्षणोपायाः अपि नैव प्राचीनराजन्यवर्गेण कल्पिताः आसन्। अतर्कितः विस्मयावहः अकस्मात् अवस्कन्दः सर्वथा नूतनः एव अनुभवः। अपरञ्च भारतीयानां परम्परागतयुद्धनीतिः तथा एतेषां वैदेशिकाक्रमणकारिणां पद्धतिः इत्यनयोर्मध्ये भूनभाङ्गणमितम् इव पार्थक्यम् आसीत्। तदानीं भारते शान्ततामयं वैभवशालि जीवनञ्च आसीत्। स्तेनेभ्यः रक्षणार्भम् आवश्यकसशस्त्रारक्षिदलादतिरिक्तं युद्धाय नित्यसिद्धशक्तिरूपेण कस्याः अपि सेनायाः (Standing Army) आवश्यकता एव नानुभूता। धर्मयुद्धस्य नियमाः सङ्केताश्च आसन्। आह्वानपूर्वकं परस्परसम्मुखं सेनायाः व्यूहरचनां कृत्वा युद्धानि अभवत्। प्रामुख्येन रथहस्तिपदातीनां समावेशः सेनायाम् आसीत्। युद्धे समुपस्थिते एव सैनिकाः आहूयन्ते स्म। अन्यथा ते सर्वे स्वेषां स्वेषां कृष्यादिव्यवसायेषु निमग्नाः आसन्। स्वभावतः अस्यै सिद्धतायै कालक्षेपः अभूत्।

परन्तु एतेषां नूतनाक्रमणकारिणां मुसलमानानां पद्धतिः नितरां भिन्ना आसीत्। प्रथमं तावत् तेषां सेनायां द्रुतगतिरेव अश्वारूढस्यैनिकानाम् अन्तर्भावः अभूत्। अपरञ्च अकस्मात् आक्रमणे अतर्कितविस्मयः एव मूलतत्त्वं बभूव। १२९७ ख्रीष्टाब्दे आलाउद्दिन् खिलजी नाम शासकस्य आक्रमणकाले सोमनाथमन्दिरस्य विग्रहः कलुषितो जातः, मन्दिरश्च लुण्ठितोऽभवत्। १७०१ ख्रीष्टाब्दे अन्तिमपर्याये सम्राट् औरङ्गजेवः मन्दिरस्य ध्वंससाधनं कृतवान्। किन्तु १७८३ ख्रीष्टाब्दे मध्यभारतस्य धर्मशीला महाराणी अहल्या मन्दिरस्य पुनःनिर्माणं कृत्वा तत्र सोमनाथविग्रहं प्रतिष्ठापितवान्। इदानीं शैवपुराणसम्मतं प्रकृतमनुसरामि—

श्रीसोमनाथः गुर्जरप्रदेशान्तर्गते, काठियावाडस्थसमुद्रपुलिने प्रभासक्षेत्रे विराजते। अत्रैव लीलापुरुषोत्तमोऽनन्तकोटिब्रह्माण्डनायकः परब्रह्मपरमात्मा परमेश्वरो भगवान् श्रीकृष्णचन्द्रो यदुवंशसंहारं कारयित्वा ज्वराव्याधविद्धपादपद्मः स्वां लीलामुपसञ्जहार इति पौराणिकाः वर्णयन्ति।

शिवपुराणानुसारेण अत्र प्रभासक्षेत्रे दक्षप्रजापतिः स्वकन्यानां सप्तविंशतिं श्रीचन्द्रेण सह विवाहयामास, परन्तु चन्द्रमसोऽनुरागातिशयो रोहिण्यामभूत्। अतः अन्यासां पत्नीनां मनःसु कष्टातिशयोऽजनि। तासां कष्टमनुभूय दक्षराजस्य आग्रहातिशयेनापि चन्द्रः रोहिण्यां तस्य अनुरागं न तत्याज। फलतो दक्षप्रजापतिनाभिशप्तः चन्द्रः क्षयरोगेण आक्रान्तः जातः। सुधाकरस्य चन्द्रमसः सुधावर्षणमवरुद्धमभूत्। ततो निखिलेऽपि ब्रह्माण्डे हाहाकारोऽभवत्। निशाकरप्रार्थनावशेन इन्द्रादिदेवता वसिष्ठादिमुनयश्च तत्र किमपि कर्तुमप्रभवः, पितामहस्य ब्रह्मणः सेवायामुपातिष्ठन्। ब्रह्मोवाच— देवादिभिः सह चन्द्रमाः प्रभासतीर्थे मृत्युञ्जयं भगवन्तमाराधयेत्। तत्प्रसादेनैव रोगमुक्तिः स्यादिति तदाज्ञया चन्द्रो देवमण्डलेन सह प्रभासक्षेत्रमुपगम्य भगवन्तं शिवमाराधयामास, षण्मासान् नैरन्तर्येण घोरं तपश्चक्रे। दशलक्षसंख्याको जपोऽभूत्। तेनाशुतोषो भगवान् सन्तुष्टः प्रकटितः, अमरत्ववरं दत्त्वोवाच यत्,—'चिन्तां मा कार्षीः। हे चन्द्र! कृष्णपक्षे प्रतिदिनम् तव एकैका कला क्षीणा भविष्यति, पुनः शुक्लपक्षे प्रतिदिनम् एकैका कला वर्धिष्यते। एवं क्रमेण प्रतिपूर्णमासि त्वं पूर्णचन्द्रो

भवेः। उक्तञ्च शिवपुराणे—

पक्षे च क्षीयते चन्द्र कला ते च दिने दिने।

पुनश्च वर्द्धतां पक्षे ताः कलाश्च निरन्तरम्॥[४]

एवमाशीर्भिराप्यायितः चन्द्रमाः पुनः सुधावर्षणेन जगच्चक्रं प्रकाशयामास। चन्द्रादिभक्त्या पूजितः प्रार्थितश्च श्रीपार्वतीसहितः श्रीशङ्करो भगवान् भक्तानुद्दिधीर्षुः ज्योतिर्लिङ्गरूपेण प्रभासक्षेत्रे सोमस्थापिततया सोमनाथरूपेणाद्यापि चकास्ति—

चन्द्रस्य यशसे तत्र नाम्ना चन्द्रस्य वै स्वयम्।

सोमेश्वरश्च नामासीद्विख्यातं भुवनत्रये॥[५]

अद्य भारतस्य रङ्गमञ्चे उदयाचलम् आरूढस्य सांस्कृतिक-हिन्दुराष्ट्रवादस्य तथा अस्ताचलं गच्छतः सेक्युलरवादाधारितस्य हिन्दु-राष्ट्रवादस्य च मध्ये घोरः संग्रामः प्रवृत्तः अस्ति। ऐतिहासिकदृष्ट्या यवनैः सह संघर्षे ये नरवीराः प्राणोत्सर्गम् अकुर्वन् तेषां प्रेरणास्रोतः हिन्दुधर्मसंस्कृतिपरम्परायाः रक्षणार्थं प्रासम्। तथा ब्रिटिशैः सह प्रचलिते स्वतन्त्रतासंग्रामेऽपि मेकले-शिक्षाप्रणाल्याः तथा प्रादेशिकराष्ट्रवादस्य प्रभावात् हिन्दुत्वं प्रति अद्य हिन्दूनाम् आस्था क्षीणतां याता, तथापि महायोगिमकरस्वामी, करपात्रस्वामी तथा महामहोपाध्यायनिरञ्जनस्वरूपब्रह्मचारिचरणप्रमुखानां कार्यकलापैः हिन्दु-चेतना अक्षुण्णा एव अतिष्ठत् इति स्पष्टम्। अस्मिन् विषये स्वातन्त्र्यप्राप्तेः (१३.११.१९४७) अनुपदमेव—भारतशासनस्य गृहमन्त्रिणा सरदार-पटेलमहोदयेन अस्य श्रीसोमनाथमन्दिरस्य पुनर्निर्माणार्थं घोषणा कृता। सम्भवतः भारतमातुः अङ्गभङ्गः तथा स्वातन्त्र्यसंग्रामसमये परिस्थितिवशात् हिन्दुत्वस्य उपेक्षा इत्युभयोः पापसदृशकार्ययोः निष्कृत्यर्थं गान्धीमहात्मनः प्रयासेन तथा प्रथमप्रधानमन्त्रिणः आध्यक्ष्ये मन्त्रिमण्डलस्य सभायां श्रीसोमनाथमन्दिरपुनर्निमाणस्य प्रस्तावोऽयं पारितः। तदानीन्तनप्रधानमन्त्रिभिः श्रीजवाहरलालनेहरूभिः श्रीवल्लभभाइपटेलमहोदयानां प्रतिरोधं कर्तुं साहसस्य अभावात् इच्छायाः विरुद्धं मौनमाश्रित्य अध्यक्षपदस्य दायित्वं निर्व्यूढम्। एकं तथ्यं विगतसन्देहधिया मनसि कर्तव्यं यत्—सर्वसाधारणहिन्दुसमाजस्य स्वाभाविकः अन्तःप्रवाहः हिन्दुधर्मं प्रति श्रद्धा तथा राष्ट्रमधिकृत्य भक्तिः इति

भावनायां समन्वितः विद्यते। रामजन्मभूमौ मन्दिरनिर्माणस्य समये धर्मं प्रति तथा कारगिलयुद्धप्रसङ्गे राष्ट्रं प्रति या आस्था समग्रहिन्दुसमाजेन स्वयंस्फूर्त्या प्रकटिता तेन प्रवृत्तिरियं लोचनगोचरा भवति। स्वार्थान्धैः सत्तालोलुपैः नेतृभिः कृतेन जातिप्रान्तादिसङ्कुचितनिष्ठानाम् आवाहनेन तथैव धनप्रलोभनेन आतङ्कप्रभावेण च सामन्यजनाः विकृतमानसिकतायाः भक्ष्या भवन्ति।

११.०५.१९५१ दिनाङ्के स्वाधीनभारतस्य प्रथमेन राष्ट्रपतिना श्रीमद्राजेन्दप्रसादमहाभागेन शास्त्रोक्तविधिना जलाभिषेकपूर्वकं श्रीसोमनाथशिवलिङ्गस्य प्रतिष्ठापना कृता। साम्प्रतं श्रीसोमनाथमन्दिरन्यासेन अस्यैतिहासिकक्षणस्य ११.०५.२००० दिनतः ११.०५.२००१ पर्यन्तं स्वर्णजयन्त्याः पञ्चाशतमः वर्षव्यापी समारोहः आयोजितः अभूत्।

उपसंहार : सोमनाथजोतिर्लिङ्गदर्शनविषये आलोचनावसारे भारतवर्षस्य राजनैतिकेतिहासः मया उक्तः। अस्य लिङ्गस्य महिमा शास्त्रेषु बहुधा दृश्यते। शिवपुराणे उक्तं—ये नराः सोमेश्वरलिङ्गस्योत्पत्तिकथनं शृण्वन्ति ते नराः सर्वपापेभ्यः मुक्ताः भवन्ति। ज्योतिर्लिङ्गरहस्यमृषिभिः प्रगीतं पुराणेतिहासादिशास्त्रे पृथक् पृथक्, विशेषतः इतिहास-पुराणमाश्रित्य शोधप्रवन्धः प्रस्तुतः। शिवतत्त्वम् ऋषिः तर्केण बुद्धिप्रागल्भ्येन विरचयामास। अत्र तज्ज्ञानविज्ञानमयं तत्त्वं मया श्रमेण अन्विष्यायं शोधप्रवन्धः प्रस्तुतः। अनेन शोधकर्मणा विद्वांसः प्रसीदन्तु मानवकल्याणं च भवेदिति अत्र मदीयप्रवृत्तिवीजम्। श्रीशैवमहापुराणे प्रोक्तमस्ति यद् भूतभावनो भगवान् शङ्करः प्राणिकल्याणाय प्रतितीर्थं वासं कुरुते। भक्तशिरोमणिजनैरर्चितं सौराष्ट्रे आविर्भूतं सोमनाथज्योतिर्लिङ्गं सदैव तदर्चकान् आनन्दयतु इति कामयामहे। अन्ते महेश्वरं प्रणमामि—

यन्नाम सकृदुच्चार्य महापातकिनो नराः।
निष्कल्मषा भविष्यन्ति तं प्रपद्ये महेश्वरम्॥

पादटीका :

१. शिवपुराणे ज्ञानसंहितायाम् ३८/१७

२. तत्रैव ३८/१८

३. तत्रैव ३८/१९

४. तत्रैव ४५/३९

५. तत्रैव ४५/४४

सहायकग्रन्थसूची:

१. आचार्यपञ्चाननतर्करत्नः, अग्निपुराणम्, नवभारतपाबलिशार्स, कोलकाता, १९९९.

२. आचार्यपञ्चाननतर्करत्नः, देवीभागवतम्, नवभारतपाबलिशार्स, कोलकाता, १४०१.

३. आचार्यजगदीशशास्त्री, लिङ्गपुराणम्, मोतिलालबनारसीदासः, दिल्ली, १९८५.

४. आचार्यपञ्चाननतर्करत्नः, शिवपुराणम्, नवभारतपाबलिशार्स, कोलकाता, १४१६.

५. पण्डितबलदेवोपाध्यायः, संस्कृतसाहित्य का इतिहास, वाराणसी, १९९५.

६. महर्षिः वेदव्यासः, गीताप्रेस, महाभारतम्, गोरक्षपुरम्, १९८८.

# नव्यस्मृतौ वङ्गीयानां योगदानम्

Tapan Das
Assistant Professor
Department of Sanskrit
Midnapore College (Autonomous)
Mob- 8348558480
Email- imtapandas@gmail.com

**प्रबन्धसारः-** स्मृधातोः क्तिन्-प्रत्यये कृते स्मृति इति रूपं भवति। स्मृति इत्यस्य अनेके अर्थाः सम्भवन्ति। स्मृति अनुभूतविषयज्ञानमिति चण्डीटीकायां नागोजीभट्टः। स्वाम्याश्रितक्रियाजन्यसंस्कारजन्यज्ञानमिति रसमञ्जरी। 'विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता। अनुभूति स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥' इति भाषापरिच्छेदे। स्मरन्ति देवमनया इति स्मृतिः। महर्षिभिर्वेदार्थचिन्तनं स्मृतिः। तद्योगात् ग्रन्थोऽपि स्मृतिरिति मुकुटः। धर्मशास्त्रमेव स्मृतिः। तथा हि उच्यते 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः'[1]। येन शास्त्रेण वेदविहिताः धर्माः स्मर्यन्ते तच्छास्त्रं स्मृतिशास्त्रमित्युच्यते। स्मरन्ति वेदमनयेति स्मृतिः। सर्वैः पालनीयाः विधिनिषेदरूपनैतिकनियमाः एतेषु शास्त्रेषु सुसंहतरूपेण वर्णिताः विद्यन्ते। संस्कृतसाहित्ये स्मृतिशास्त्रकाराणां संख्याः अनेकाः भवन्ति। याज्ञवल्क्यसंहितायां विंशतिः स्मृतिशास्त्रकाराणां नामोल्लेखः प्राप्यते। तथा हि-

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्तः कात्यायनबृहस्पती ॥
पराशर व्यासशङ्खलिखिता दक्षगौतमौ ।

[1] मनुस्मृतिः- 2/10

शातातपो वशिष्टचश्य धर्मशास्त्र प्रयोजकाः"[2] ।। इति।।

यद्यपि एतेषु सर्वेषां स्मृतिकाराणां शास्त्राणि नोपलभ्यन्ते तथापि स्मृतिशास्त्रकारेषु एतैव अग्रगण्याः। प्रबन्धेऽस्मिन् एतेषां विषये नालोच्यते। परन्तु स्मृतिनिबन्धनेषु बङ्गीयानां योगदानमिति विषयः आलोच्यते। बङ्गेऽपि बहवः स्मृतिशास्त्रकाराः अजायन्त। तेषां विषये चर्चा करणीयेति धीया प्रबन्धोऽयं प्रस्तूयते।

**कूटशब्दाः-** स्मृतिः, स्मृतिशास्त्रम्, स्मृतिशात्रकारः,बङ्गदेशः, स्मृतिनिबन्धः,बङ्गीयस्मृतिशास्त्रकारः।

**भूमिका-** बङ्गीयानां सांस्कृतिकेतिहासे मध्ययुगीयबङ्गदेशस्य कीर्तिस्वरूपं स्तम्भत्रयं विद्यते। नव्यन्यायः नव्यस्मृतिः तन्त्रविद्या चेति। अस्मिन् प्रदेशे कुशाग्रबुद्धिसम्पन्नाः अनेके नैयायिकाः अजायन्त। तेषु रघुनाथशिरोमणिमहाभागाः अग्रगण्याः। बङ्गे नव्यस्मृतिरचनायाः धारा प्रायः ईसवीयदशमशतके एकादशशतके वा आरब्धा। षोडशशतके रघुनन्दनमहोदयस्य प्रादुर्भावे सा परिपूर्णता लब्धा। नव्यस्मृतिरेव स्मृतिनिबन्धपदेनोच्यते। स्मृतिनिबन्ध इत्यत्र निबन्धः इति शब्दः नि-पूर्वक-बन्धनार्थक-बन्धधातोः निष्पन्नः। शब्दोऽयं क्षेत्रविशेषे भिन्नार्थेषु व्यवहृतः। क्वचित् साहित्यिकरचनामात्रमेव निबन्धः इत्यभिहितः[3]। सामान्यतः स्मृतिनिबन्धाः एव नव्यस्मृतिः इत्याख्यायन्ते। मनुयाज्ञवल्क्यप्रभृतिभिः विरचिताः स्मृतिग्रन्थास्तु प्राचीनस्मृतिः इति।

स्मृतिनिबन्धानां न केवलं शास्त्रदृष्ट्या गुरुत्वं अपि तु ऐतिहासिकदृष्ट्यापि गुरुत्वं विद्यते। उपनयन-विवाह-श्राद्ध-व्रतादिसंस्कारानुष्ठानानि समाजे नित्यप्रचलितानि सन्ति। तेषां सम्यक् ज्ञानाय स्मृतिनिबन्धाः अपरिहार्याः। बङ्गदेशे रचितानां स्मृतिनिबन्धानां संख्या अनेका वर्तते। तेषां टीकाटिप्पण्यपि बहूनि विद्यन्ते।

**निबन्धप्रकारः-** प्राचीनस्मृतिशास्त्रेषु आलोच्यमान् विषयान् संक्षिप्य सहजेनपोपायेन संसारस्य सर्वस्तरीयजनानां बोधसौकर्याय नव्यस्मृतेः रचना कृता। प्राचीनानि दुरूहरूपाणि गृह्यसूत्राणि धर्मसूत्रादीनि शास्त्राणि पर्यालोच्य तदानीन्तनैः स्मार्तपण्डितैः येः स्मृतिग्रन्थाः विरचिताः ते एव स्मृतिनिबन्धश्रेणीषु अन्तर्गताः। प्रधानतः एतेषु आलोच्यनानां विषयाणां त्रैविद्ध्यं दृश्यते। आचारः प्रायश्चित्तो व्यवहारश्चेति। मनुयाज्ञवल्क्यस्मृतीणां यानि

---

[2] या. सं- 1/4-5

[3] Sanskrit-English Dictionary -M. Williams

टीकाभाष्यादीनि वर्तन्ते तत्र न केवलं मूलविषयस्य व्याख्या विद्यते अपि तु विरुद्धमतानां समालोचना मतानां सामञ्जस्यविधानमपि दृश्यते। पण्डितवरकाणेमहोदयस्य मते एते टीकाभाष्यग्रन्थाः निबन्धसाहित्यमेव। स आह- "There is no hard and fast line of demarcation between a tika and a nibandha"[4]। अर्थात् टीकानिबन्धयोर्मध्ये कापि पार्थक्यबोधकसीमारेखा नास्ति।

एतत्सर्वं परिलक्ष्य स्मृतिनिबन्धानां प्रकारद्वयं कृतं विद्यते। यथा-

1. **विशुद्धनिबन्धः** – यथा देवणभट्टस्य 'स्मृतिचन्द्रिका', रघुनन्दनस्य 'अष्टाविंशतितत्त्वमि'ति।

2. **टीकानिबन्धः**- यथा मेधतिथेः 'मनुभाष्यम्', याज्ञवल्क्यस्मतेरुपरि विज्ञानेश्वरस्य 'मिताक्षरा' इति।

एतयोर्मध्ये प्रथमप्रकाराणां निबन्धानां भागद्वयं कर्तुं शक्यते। तद्यथा-

1. **व्याख्यानमूलकम्**- एतज्जातीयेषु ग्रन्थेषु विशिष्टेषु विषयेषु भिन्नानां स्मृतिकाराणां मतानि उद्धृतिपुरःसरं व्याख्यातानि सन्ति। किञ्च विरुद्धमतानां सामञ्जस्यविधानमपि विद्यते। यथा जीमूतवाहनस्य 'कालविवेकः'।

2. संक्षिप्तसाररूपम्- एतज्जातीयेषु ग्रन्थेषु नानाग्रन्थेभ्यः प्रमाणादीनि उद्धृतानि सन्ति। तदुपरि निबन्धकारस्य विशिष्टं मतं न विद्यते। यथा हेमाद्रेः 'चतुर्वर्गचिन्तामणिः'।

**वङ्गीयस्मृतिनिबन्धानामुत्पत्तिः क्रमविकाशश्च-** वङ्गीयस्मृतिशास्त्राणामुत्पत्तिविषये लोकेषु इयं धारणा प्रचलिता वर्तते यत् रघुनन्दन-भट्टाचार्यमहोदय एव वङ्गीयस्मृतेः प्रवर्तकः। परन्तु धारणेयं समीचीना न। रघुनन्दनात् प्रागपि अस्मिन् प्रदेशे नव्यस्मृतेः सम्प्रदायाः आसन्। अद्यावधि प्रकाशितेषु स्मृतिनिबन्धेषु भवदेवभट्टमहोदस्य ग्रन्थाः एव प्राचीनाः। तत्पूर्वमपि वङ्गे नव्यस्मृतेः प्रचलनमासीत्। साधारणतः रघुनन्दनः वङ्गीयस्मृतिशास्त्राणां प्रवर्तक इति स्वीक्रियते। तत्र कारणं हि वङ्गीयस्मृतिशास्त्रकारेषु सः अधिकप्रतिभावान् आसीत्। तद्विरचिताः ग्रन्थसंख्या सर्वाधिका। तस्य विचारपद्धतिरपि सर्वोत्कृष्टा आसीत्।

अद्यावधि वङ्गदेशे येषां स्मृतिकाराणां नामानि प्राप्यन्ते तेषामेवं विभागः क्रियते-

1. प्राग्रघुनन्दनयुगीयाः

[4] History of Dharmashastra. Vol-I, Page-247

2. रघुनन्दनयुगीयाः

3. अप्रसिद्धग्रन्थकर्तारः

विभागत्रये विद्यमानां ग्रन्थाकाराणां ग्रन्थेषु युगवैशिष्ट्यमपि दृश्यते। तद्यथा प्राग्रघुनन्दनयुगीयलेखेकेभ्यः रघुनन्दनयुगीयलेखकानां ग्रन्थेषु विषाधिक्यं विद्यते। न्यायमीमांसादृष्ट्या विषयव्याख्यानञ्च परवर्तिनां ग्रन्थकाराणं ग्रन्थेषु दृश्यते। तृतीये विभागे अनेकानामप्रसिद्धग्रन्थकाराणां नामानि प्राप्यन्ते ये रघुनन्दनस्य परवर्तिनः इति स्पष्टतया वक्तुं न शक्यते। किञ्च एतेषां ग्रन्थेषु विषयाभिनवत्वं विचारमौलिकत्वमपि न परिलक्ष्यते।

**वङ्गीयस्मृतिशास्त्रकाराः-** विगानुसारेण केषाञ्चित् वङ्गीयस्मृतिकाराणां नामानि अत्रोल्लिख्यन्ते-

1. **प्राग्रघुनन्दनयुगीयाः-** भवदेवभट्टः, जीमूतवाहनः, अनिरुद्धभट्टः, बल्लालसेनः, हलायुधः, शूलपाणिः, बृहस्पतिः रायमुकुटः, श्रीनाथः आचार्यचूरामणिश्चेति।

2. **रघुनन्दनयुगीयाः-** रघुनन्दनः, गोविन्दानन्दश्चेति।

3. **अप्रसिद्धशास्त्रकाराः-** अन्तरामः विद्यावागीशः, आनन्दवनः, कृपारामः, कृष्णमोहनन्यायालङ्कारः,कृष्णानन्द-विद्यावागीश-भट्टाचार्यः, गुणानन्दः, गोपाल-सिद्धान्तवागीश-भट्टाचार्यः, गोपाल-न्यायपञ्चाननः, चतुर्भूज-भट्टाचार्यः, चन्द्रशेखर-भट्टाचार्यः, जगदानन्दः, धनञ्जयः, नारायणशर्मा, पशुपतिः, प्राणकृष्णः, बलदेव-तर्कवागीश-भट्टाचार्यः, भट्टभवदेवः, मधुसूदन-चट्टवाचस्पतिः, मधुसूदन-वाचस्पति-भट्टाचार्यः, महेश्वरः पञ्चाननः, यादवेन्द्रः शर्मा, रघुनाथः सार्वभौमः, रामनाथः विद्यावाचस्पतिः, राधामोहनशर्मा, राधामोहनगोस्वामीभट्टाचार्यः, रामगोविन्दशर्मा, रामचन्द्रशर्मा, रामचन्द्रभट्टाचार्यः, विद्याभूषणभट्टाचार्यः, वेणीनाथशर्मा, वेदाचार्यः, श्रीनिवासण्डितः, हरिनारायणशर्मा, हलायुधः इति।

अधुना एतेषां ग्रन्थकाराणां नव्यस्मृतौ योगदानमालोच्यते-

**प्राग्रघुनन्दनयुगीयाः-**

**1.भवदेवभट्टः**

**देशः-** उत्कलप्रदेशस्य राजधान्यी भवति भुबनेश्वरः। तत्र विद्यमाने अनन्तवासुदेवस्य मन्दिरगात्रे उत्कीर्णा लिपिः अस्यैव भवदेवभट्टस्य। तत्कालीनराढप्रदेशस्य सिद्धलनामके स्थाने अस्य वासः आसीत्। 'बालवलभीभूजङ्ग' इति उपाधिना अयं भूषितः आसीत्।

**कालः-** भवदेवभट्टस्य जीवनकालविषये पण्डितेषु मतवैचित्र्यं विद्यते। साधारणतः ईसवीयः एकादशशतकः अस्य जीवनकालः इति परिगण्यते।

**ग्रन्थाः-** भवदेवविरचिताः स्मृतिग्रन्थाः भवन्ति-

क.) **व्यवहारतिलकम्-** रघुनन्दनस्य ग्रन्थे ग्रन्थस्यास्योल्लेखो विद्यते। ग्रन्थोऽयं नोपलभ्यते।

ख.) **कर्मानुष्ठानपद्धतिः-** 'दशकर्मपद्धतिः', 'संस्कारपद्धतिः', 'छन्दोगपद्धति' इत्यादिना नाम्नापि ग्रन्थस्य प्रसिद्धिरस्ति। सामवेदीयसंस्कारादिरत्रालोच्यते।

ग.) **प्रायश्चित्तप्रकरणं निरूपणं**[5] वा- विविधानि पापानि तेषां प्रायश्चित्तानि चात्रालोचितानि।

घ.) **सन्धिविवेकः**[6]- विवाहसम्बद्धाः विषयाः अत्रालोचिताः।

ङ.) **शवसुतिकाशौचप्रकरणम्-** जाताशौचः मृताशौचश्चेति अस्यालोच्यो विषयः।

**जीमूतवाहनः-**

**देशः-** जीमूतवाहनस्य राढप्रदेशस्य पारिभद्रीयवंशे जन्म अभवत्।

**कालः-** शूलपाणिः तस्य 'दुर्गोत्सवविवेक'नामके ग्रन्थे जीमूतवाहनस्य तस्य 'कालविवेकनामक'ग्रन्थस्य चोल्लेखः कृतः। शूलपाणेः काल अनुमीयते ख्रीष्टीय-चतुर्दशशतकः। एतेन जीमूतवाहनस्य तत्पूर्ववर्त्तित्वं ज्ञायते।

**ग्रन्थाः-**

क.) **कालविवेकः-** विविधधर्मानुष्ठानोपयोगी कालः अत्रालोचितः।

ख.) **व्यवहारमातृका**[7]- अस्मिन् ग्रन्थे विवादविषयः विचारपद्धतिश्चालोचितः।

ग.) **दायभागः**[8]- ग्रन्थस्यास्य विषयस्तावत् पैतृककसम्पत्तिनां भागः उत्तराधिकारः उत्तराधिकाराणां क्रमश्चेति।

[5] Published from Varendra Research Society of Rajshahi (1927)

[6] ढाकाविश्वविद्यालये अस्य खण्डिता पुथिः विद्यते। वर्तमाने सुरेशचन्द्रवन्दोपाध्यायकद्वारा सम्पादितः।

[7] सम्पादकः आशुतोष-मुखोपाध्यायः, एसियाटिक-सोसाइटि-अव्-वेङ्गलकर्तृकं प्रकाशितम्।

[8] सम्पादकः भरत-शिरोमणिः, कलिकाता, 1863

**अनिरुद्धभट्टः**

**देशः**- महामहोपाध्यायस्य धर्माध्यक्षस्य अनिरुद्धभट्टमहोदस्य गङ्गानद्याः तीरवर्तिनि चम्पाहाट्टिनामके स्थाने वासः आसीत्। ज्ञायते यत् अयं मीमांसककुमारिलभट्टानुरागी आसीत्। अयं बङ्गेश्वरस्य वल्लालसेनस्य गुरु आसीदिति 'दानसागर'नामके ग्रन्थे वल्लालसेनः स्वयमुक्तवान्।

**कालः**- अस्य कालः क्रिस्तीयद्वादश-चतुर्दशशतकयोमध्यवर्तित्वमनुमीयते।

**ग्रन्थाः**-

क.) **हारलता**- अशौचविषयकः ग्रन्थोऽयम्।

ख.) **पितृदयिता**[9]- अयं ग्रन्थः 'कर्मोपदेशिनीपद्धति' 'कर्मोपदेशिनी ' वेति नाम्नापि परिचीयते। विविधानुष्ठानानि विशेषतः श्राद्धानुष्ठानकर्म अत्र आलोचितः।

इतोऽपि 'चातुर्मास्यपद्धति' इति ग्रन्थः अनिरुद्धभट्टमहोदयस्येति प्रसिद्धिः।

**वल्लालसेनः**- समाजसंस्कारकः सुपण्डितः वल्लालसेनः बङ्गदेशस्य एकः सुप्रसिद्धः राजा आसीत्। तत्प्रवर्तिता 'कौलीन्यप्रथा' अद्यावधि वङ्गदेशे विद्यमाना वर्तते।

**कालः** – वल्लालसेनः क्रिस्तीयस्य द्वादशशतकस्य राजा आसीत् इति अनुमीयते।

**ग्रन्थाः**-

क.) **दानसागरः**- विविधदानसम्बद्धोऽयं ग्रन्थः।

ख.) **अद्भूतसागरः**[10]- शुभाशुभलक्षणान्यस्यालोच्यो विषयः।

किञ्च वल्लालसेनस्य इतोऽपि 'प्रतिष्ठासागर' 'आचारसागर' चेति ग्रन्थद्वयस्य नामोल्लेखः दानसागरग्रन्थस्य ५५तमे ५६तमे च श्लोके विद्यते।

[9] संस्कृत साहित्य परिषत् सिरिज, संख्या-6, कलिकाता
[10] सम्पादकः मुरलीधर-झा, वाराणसी, 1905

**हलायुधः-**

हलायुधः वात्स्यगोत्रीयधनञ्जयस्य पुत्रः वङ्गेश्वरस्य लक्ष्मणसेनस्य धर्माध्यक्षश्चासीत्। लक्ष्मणसेनः ११७८तः १२०६पर्यन्तं कालयावत् वङ्गाधीशः आसीत्। अतः हलायुधोऽपि तत्कालीनः इति वक्तुं शक्यते।

**ग्रन्थाः-** हलायुधस्य 'ब्राह्मणसर्वस्वम्'[11] इति सुप्रसिद्धः ग्रन्थः। ग्रन्थोऽयं 'कर्मोपदेशिनी' इति नाम्नापि प्रसिद्ध्यते। अत्र वाजसनेयिसंहितायाः काण्वशाखान्तर्गतानां ब्राह्मणानां नित्यकर्माणि वैदिकसंस्कारपद्धतिः तत्सम्बन्धिनः मन्त्राश्च व्याख्याताः सन्ति। अस्मिन् ग्रन्थे हलायुधः 'मीमांसासर्वस्व', 'वैष्णवसर्वस्व', 'शैवसर्वस्व', 'पण्डितसर्वस्व' इत्येते ग्रन्थाः तेनैव कृताः इत्युल्लिखितम्।

**शूलपाणिः-** वङ्गदेशस्य एकः प्रसिद्धः स्मृतिकारो भवति शूलपाणिः। अस्य जीवनकालविषये सुस्पष्टं तथ्यं न प्राप्यते। अनुमीयते यत् एकादशशतकात् पञ्चदशशतकपर्यन्तं समयकालेषु कदाचित् अयमासीत्।

**ग्रन्थाः-** शूलपाणिः याज्ञवल्क्यस्मृतेरुपरि 'दीपकलिका' टीका विरचिता। इतोऽपि तद्विरचिताः ग्रन्थाः भवन्ति-

क.) दोलयात्राविवेकः[12]

ख.) व्रतकालविवेकः

ग.) सम्बन्धविवेकः[13]

घ.) दत्तकविवेकः

ङ.) एकादशीविवेकः

च.) संक्रान्तिविवेकः

छ.) दुर्गोत्सवविवेकः

ज.) श्राद्धविवेकः[14]

---

[11] सम्पादकः तेजसचन्द्रः विद्यानन्दः, कलिकाता, 1331 वङ्गाब्दः

[12] Ed. S.C. Banerji, 'A Volume of Studies in Indology' presented to Kane, Poona, 1941

[13] Ed. S.C.Banerji, Kolkata,1942

[14] सम्पादकः चारुकृष्ण-भट्टाचार्यः, कलिकाता, 1861

झ.) प्रायश्चित्तविवेकः[15]

ञ.) तिथिविवेकः

किञ्च इतोऽपि अनेकेषु ग्रन्थेषु शूलपाणेः नामोल्लेखो विद्यते। परन्तु स शूलपाणिः बङ्गीयशूलपाणिः एव इति विवादविषयः।

**श्रीनाथः आचार्यचूडामणिः-** बङ्गदेशीयनव्यस्मृतेः प्रवर्तकत्वेन रघुनन्दनस्य नाम अतिप्रसिद्धम्। तस्य गुरुः आसीत् श्रीनाथः आचार्यचूडामणिः। रघुनन्दनः स्वग्रन्थेषु 'गुरुचरणाः' 'गुरुपादाः' इति सम्मानसूचकपदोल्लेखपूर्वकं श्रीनाथस्य मतानि उल्लिखितानि। रघुनन्दनस्य कालः ईसवीयस्य षोडशशतकस्य मध्यवर्ती भागः तत्समीपस्थः कालः वा। अतः श्रीनाथस्य कालः पञ्चदशशतकस्य अन्तीमभागात् षोडशशतकस्य प्रथमभागः इति अनुमीयते।

**ग्रन्थावली-** श्रीनाथस्य बहवः ग्रन्थाः विद्यन्ते। यथा- 'विवाहार्णवः', 'कृत्यतत्त्वार्णवः', 'शुद्धितत्त्वार्णवः', 'गूढदीपिका', 'श्राद्धदीपिका', 'आचारचन्द्रिका', 'श्राद्धचन्द्रिका', 'दानचन्द्रिका', 'दुर्गोत्सवविवेकः', 'प्रायश्चित्तविवेकः', 'शुद्धिविवेकः' इति। अपि च श्रीनाथेन अनेकाः टीकाग्रन्थाः अपि विरचिताः। यथा- 'सारमञ्जरी', 'तात्पर्यदीपिका', 'श्राद्धविवेकव्याख्या', 'दायभागटिप्पनी' इति।

**रघुनन्दनयुगीयाः-**

**रघुनन्दनः भट्टाचार्यः-** बङ्गीयनव्यस्मृतौ एकः प्रदीप्तः भास्करः भवति रघुनन्दनः। 'स्मार्तभट्टाचार्याः' 'स्मार्ताः' वेति पदेन तस्यैव प्रसिद्धिरस्ति। नवद्वीपे अस्य जन्म अभूत्।

रघुनन्दनस्य 'मलमासतत्त्वम्' इति ग्रन्थस्य प्रारम्भे अष्टाविंशतितत्त्वानामुल्लेखोऽस्ति। अन्येषां च रघुनन्दनस्य ग्रन्थानां नामानि भवन्ति-

क.) **दायभागटीका-** जीमूतवाहनस्य 'दायभाग' इति ग्रन्थस्य टीकेयम्।

ख.) **तीर्थयात्रतत्तं (तीर्थतत्त्वं वा)**[16]- वाराणसी-गया-प्रयागादीन् पूण्यस्थलान् गमनात्पूर्वं परञ्च करणीयाणामनुष्ठानां बर्णनं विद्यते।

ग.) **द्वादशयात्रातत्त्वं** [17]**(यात्रातत्त्वं वा)-** जगन्नाथदेवस्य यात्रावलम्बने विरचितोऽयं ग्रन्थः।

---

[15] सम्पादकः जीवानन्दः विद्यासागरः, कलिकाता, 1893

[16] संस्कृतसाहित्यपरिषत् सिरिज, संख्या-12, कलिकाता।

**घ.) गयाश्राद्धपद्धतिः**[18]

**ङ.) रासयात्रापद्धतिः**[19]

**च.) त्रिपुष्करशान्तितत्त्वम्**[20]

**छ.) ग्रहयागतत्त्वम्**[21]- ग्रहशान्तिनिमित्तं कर्तव्यानि अनुष्ठानानि अत्र विषयः।

**गोविन्दानन्दः**

ग्रन्थेषु प्रदत्तात्मपरिचयात् ज्ञायते यत् अयं मेदिनीपुरमण्डलस्थे वाग्डिनामके स्थाने गणपतिभट्टस्य गृहे जनिं लेभे। 'कविकङ्कणाचार्य' अस्य उपाधिः आसीत्। ईसवीयषोडशशतकस्य मध्यवर्तिनि काले अयमासीदिति मन्यते।

**ग्रन्थसमूहः-**

**क.) दानक्रियाकौमुदी**

**ख.) शुद्धिकौमुदी**

**ग.) श्राद्धक्रियाकौमुदी**

**घ.) वर्षाक्रियाकौमुदी**

ङ.) **तत्त्वार्थकौमुदी** (शुद्धपाणिकृतस्य प्रायश्चित्तविवेकस्य टीका)

च.) **अर्थकौमुदी** (श्रीनिवासस्य शुद्धिदीपिकायाः टीका)

**अप्रसिद्धग्रन्थकाराः-**

विभिन्नस्थानेषु विद्यमानासु पुथिशालासु केचित् लघुकायाः स्मृतिग्रन्थाः संरक्षिताः विद्यन्ते। तन्मध्ये केचित् ग्रन्थाः वङ्गीयानामिति निर्धार्यते। एते रघुनन्दनस्य परवर्तिन उत्तरवर्तिनः वेति तथ्याभावात् वक्तुं न शक्यते। केचित् केवलं टीकाटीप्पनीमात्रं विरचतिवन्तः। अन्येषु ग्रन्थेष्वपि मौलिकत्वं न दृश्यते।

---

[17] तत्रैव, संख्या-16, कलिकाता।
[18] द्रष्टव्यः- History of Dharmashastra
[19] तदेव
[20] तदेव
[21] संस्कृतसाहित्यपरिषत् सिरिज, संख्या-12,कलिकाता।

निम्ने केचित् ग्रन्थकाराणां तत्कृतग्रन्थानां परिचयः प्रदीयते।

| ग्रन्थकाराः | ग्रन्थाः |
|---|---|
| अन्तरामः विद्यावागीशः | 'सहानुमरणविवेकः',' विवादचन्द्रिका' |
| आनन्दवनः | रामार्चनचन्द्रिका |
| कृपारामः | नव्यधर्मप्रदीपः |
| कृष्णमोहनन्यायालङ्कारः | प्रायश्चित्तलक्षणविचारः |
| कृष्णानन्द-विद्यावागीश-भट्टाचार्यः | कृत्यपल्लवदीपिका षट्कर्मदीपिका वा |
| गुणानन्दः | स्मृतिसारः |
| गोपाल-सिद्धान्तवागीश-भट्टाचार्यः | विवाहव्यवस्थासंक्षपः, व्यावहारलोकः |
| गोपाल-न्यायपञ्चाननः | अशौचनिर्णयः, आचारनिर्णयः, कालनिर्णयः,तिथिनिर्णयः, दायभागनिर्णयः, दुर्गोत्सवनिर्णयः, प्रायश्चित्तनिर्णयः इत्यादि |
| चतुर्भूज-भट्टाचार्यः | अशौचसंग्रहः, गङ्गाभक्तिरतङ्गिणी |
| चन्द्रशेखर-भट्टाचार्यः | धर्मदीपिका,स्मृतिप्रदीपः, स्मृतिदुर्गभञ्जनः, स्मृतिसारसंग्रहः, द्वैतनिर्णयः |
| जगदानन्दः | कृत्यकौमुदी |
| धनञ्जयः | धर्मप्रदीपः |

| | |
|---|---|
| नारायणशर्मा | शुद्धिकारिका, व्यवस्थासारसञ्चयः |
| पशुपतिः | कर्मानुष्ठानपद्धतिः, दशकर्मपद्धतिः |

किञ्च नव्यस्मृतौ आधुनिकानां वङ्गीयस्मृतिकाराणामपि योगदानं परिलक्ष्यते। तथा हि-

**चन्द्रकान्त तर्कालङ्कारः-** मयमनसिंहवासा महामहोपाध्यायः चन्द्रकान्त-तर्कालङ्कारः कांश्चित् स्मृतिनिबन्धान् विरचितवान्। 'उद्वाहचन्द्रालोकः', 'शुद्धिचन्द्रालोकः', 'ऊर्ध्वदेहिकचन्द्रालोक'श्चेति तस्यैव कीर्तिः।

**काशीचन्द्र-विद्यारत्नः-** पूर्ववङ्गस्य विक्रमपुरस्थिते एकस्मिन् ब्राह्मणपरिवारे 1854 ईसवीयाब्दे महोदयस्य जन्म अभवत्। पण्डितोऽयं मनुसंहितादि विंशति धर्मशास्त्राणां टीका विरचिता। तन्मध्ये मनुसंहितायाः टीकैव मुद्रिता अस्ति। 'उद्धारचन्द्रिका'[22] इति तस्य मौलिकनिबन्धः।

**हरिदास-सिद्धान्तवागीशः-** अयं महोदयः 1283वङ्गाब्दे पूर्ववङ्गस्य फरिदपुरजेलान्तर्गतस्य ऊनशियाग्रामे जनिं लेभे। अस्य पिता आसीत् गङ्गाधरः विद्यालङ्कारः माता च विधुमुखी देवी। गङ्गाधरस्य पिता काशिचन्द्र सुमहान् पण्डितः आसीत्। हरिदासः काव्य-व्याकरण-स्मृत्यादिशास्त्रेषु विचक्षण आसीत्। महामहोपाध्याय इति उपाधिना अयं भूषितः आसीत्। महोदयविरचितस्य स्मृतिग्रन्थस्य नाम 'स्मृतिचिन्तामणिः'[23]। नित्यादि शास्त्रविहितकर्म अत्रालोच्यते।

**आलोचना-** मनुयाज्ञवल्क्यादीनां स्मृतिनां व्याख्या विरुद्धवचनानाञ्च सामञ्जस्य विधानमेवासीत् नव्यस्मृतेः मुख्यमुद्देश्यम्। स्मृतिस्तु भवति वेदमूला। वेद अपौरुषेयः। तस्य परिवर्तनं अन्यथा कर्तुं वा न शक्यते। परन्तु स्मृतिशास्त्राणि पुरुषप्रणितानि। तस्य परिवर्तनं शक्यम्। आस्तिकदर्शनानि षट् भवन्ति। सर्वाणि वेदस्य प्रामाण्यमङ्गीकुर्वन्ति। ऊर्ध्वरेतसः त्रिकालदर्शिनः महर्षयः स्वानुभवानुसारेण वैदोक्ततत्त्वानि उपदिष्टवन्तः। अतः आस्तिकदर्शनेषु भेदः दृश्यते। अपि च बौद्धदर्शने सम्प्रदायचतुष्टयं विद्यते। एतद्विषये सर्वदर्शनकार आह -"यद्यपि भगवान् बुद्धः एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यम्"[24] इति। ब्रह्मसूत्राणां गीतायाः अन्येषा ग्रन्थानामपि बहवः व्याख्यातारो व्याख्याग्रन्थाश्च विद्यन्ते। प्राचीनस्मृतेः व्याख्यानरूपाणि भवन्ति नव्यस्मृतयः।

---

[22] प्रकाशितः, कलिकाता, 1321 वङ्गाब्दः

[23] First Edition published from nakipur (Khulna), 1319 वङ्गाब्दा

[24] सर्वदर्शनसंग्रहे

वैचित्रपूर्णो देशोऽस्माकं भारतः। देशभेदे जनानामाचारव्यवहारपरिधानेषु वैचित्र्यं परिलक्ष्यते। भाषास्वपि तथैव। तस्मात् देशस्य सर्वत्र एकस्याः एव स्मृतेः व्यवहारः प्रचलं प्रामाण्यं वा स्यादिति असम्भवम्। तस्मात् भिन्नेषु प्रान्तेषु शास्त्रज्ञाः पण्डिताः नव्यस्मृतिग्रन्थान् विरचितवन्तः। किञ्च शब्दानां धातोश्चानेकार्थत्वं प्रसिद्धमेव। एकमेव शब्दं वाक्यं वा धीमन्तः बहुधा व्याख्याययितुमर्हन्ति। व्याख्यानभेदात् विभिन्ननव्यस्मृतिग्रन्थानामुद्भवः जातः। वङ्गीयपण्डिताः वङ्गीयानामाचारव्यवहारजीवनशैलीं परिलक्ष्य एदनुकुलमाचारव्यवहारप्रायश्चित्तरूपाणि शास्त्राणि विरचितवन्तः।

**उपसंहारः**- संस्कृतं जगतः एकतमा अतिप्राचीना समृद्धा शास्त्रीया च भाषा वर्तते। भारती, सुरभारती, अमरभारती, अमरवाणी, सुरवाणी, गीर्वाणवाणी, गीर्वाणी, देववाणी, देवभाषा, संस्कृतावाक्, दैवीवाक्, इत्यादिभिः नामभिः एतद्भाषा प्रसिद्धा। संस्कृतवाङ्मयं विश्ववाङ्मये अद्वितीयं स्थानम् अलङ्करोति। संस्कृतस्य प्राचीनतमग्रन्थाः वेदाः सन्ति। वेद-शास्त्र-पुराण-इतिहास-काव्य-नाटक-दर्शनादिभिः अनन्तवाङ्मयरूपेण विलसन्ती अस्ति एषा देववाक्। न केवलं धर्म-अर्थ-काम-मोक्षात्मकाः चतुर्विधपुरुषार्थहेतुभूताः विषयाः अस्याः साहित्यस्य शोभां वर्धयन्ति अपितु धार्मिक-नैतिक-आध्यात्मिक-लौकिक-वैज्ञानिक-पारलौकिकविषयैः अपि सुसम्पन्ना इयं देववाणी। सुसम्पन्ने साहित्यभाण्डारे यथा अपौरुषेयः वेदः विद्यते तथैव महर्षिणां धर्मशास्त्राणि कालिदासादिनां काव्यान्यपि विद्यन्ते। सुसम्पन्ने साहित्यभाण्डारे वङ्गीयाः शास्त्राकाराः कवयोऽपि तेषां योगदानं कृतवन्तः। वङ्गेष्वपि शास्त्रचर्यायाः परम्परा आसीत्। शिष्यते अनेनेति शास्त्रम्। शास्ति च त्रायते चासौ शास्त्रम्। सुप्राचीनकालादेव शास्त्रकाराः अस्मान् अनधिगताविदितार्थान् ज्ञापयितुं धर्ममार्गे प्रवर्तयितुञ्च शास्त्राणि रचितवन्तः। अस्माभिः तत्प्रदर्शितेषु मार्गेषु गन्तव्यम्। सर्वदा मनसि एतद्धातव्यं यत्

"धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः

तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥"[25]इति शम्।।

[25] मनुस्मृतिः- 8/15

### সহায়কগ্রন্থসূচী


- বন্দ্যোপাধ্যায়, শ্রীসুরেশচন্দ্র। সংস্কৃতসাহিত্যে বাঙালীর দান। কলিকাতা, সংস্কৃত পুস্তক ভাণ্ডার।
- বন্দ্যোপাধ্যায়, শ্রীসুরেশচন্দ্র। স্মৃতিশাস্ত্রে বাঙালী। কলিকাতা, এ, মুখার্জী অ্যাণ্ড কোং প্রাঃ লিঃ, ১৩৬৭।
- বন্দোপাধ্যায়, সুরেশচন্দ্র। ভট্টাচার্য, শ্রীনারায়ণ। সংস্কৃতসাহিত্যের ভূমিকা। দ্বিতীয় ভাগ। কলিকাতা, এ, মুখার্জী অ্যাণ্ড কোং প্রাঃ লিঃ, ১৩৬৭।
- Mukhopadhyaya, Govindagopala. A New Tri-Lingual Dictionary: Sanskrit-Bengali-English. Varanasi, Pilgrims Publishing, 2002.
- स्याररराजाराधाककान्तदेवबाहादुर-प्रणीतः शब्दकल्पद्रुमः। जनकपूरी, राष्ट्रीयसंस्कृतसंस्थानम्, 2018।